# प्रारूपात्मिका राष्ट्रिय-शिक्षा-नीतिः - २०१६

## (प्रारूपात्मकाः केचन बिन्दवः)

मानवसंसाधनविकासमन्त्रालयः
भारतसर्वकारः

# विषयसूची


1 प्रस्तावना

2 शिक्षणक्षेत्रे प्रमुखाः समस्याः

3 दृष्टिः, लक्ष्यम्, उद्देशाश्च

4 नीतेः संरचना

4.1 शालापूर्वशिक्षणम्

4.2 बालकिशोरशिक्षणाधिकारस्य संरक्षणम्

4.3 विद्यालयशिक्षणे अधिगमस्य परिणामाः

4.4 विद्यालयीयशिक्षणम्

4.5 पाठ्यक्रमस्य नवीकरणं परीक्षापद्धतेः परिष्कारः च

4.6 समावेशिशिक्षणं छात्रसाहाय्यं च

4.7 साक्षरता आजीवनं शिक्षणं च

4.8 शिक्षायां कौशलं नियोजनीयता च

4.9 शिक्षाक्षेत्रे सूचना-संवहनप्रौद्योगिक्याः (आई.सी.टी) उपयोगः

4.10 शिक्षकस्य विकासः प्रबन्धनं च

4.11 शिक्षणे भाषा, संस्कृतिः च

4.12 व्यापकशिक्षणमाध्यमेन आत्मविकासः

4.13 विद्यालयानां मूल्याङ्कनं शासनं च

4.14 उच्चशिक्षणे शासनसम्बद्धप्रगतिः

4.15 उन्नतशिक्षणे नियन्त्रणम्

4.16 उन्नतशिक्षणे गुणवत्तायाः आश्वासनम्

4.17 मुक्तदूरस्थशिक्षणं मुक्तजालपुटपाठ्यक्रमः च

4.18 शिक्षायाः अन्ताराष्ट्रीयकरणम्

4.19 उन्नतशिक्षणे प्रशिक्षणकौशलवर्धनम्

4.20 अनुसन्धानं नवगवेषणं नूत्नं ज्ञानं च

4.21 शिक्षणस्य वित्तसाहाय्यम्

5 क्रियान्वयनं परिनिर्वहणं च

## अध्यायः - १

# प्रस्तावना

भारतेन सर्वदा शिक्षणस्य अतिमहत्त्वयुतं स्थानं परिगणितम् अस्ति । प्राचीनभारते सर्वप्रथमं या शिक्षणपद्धतिः विकसिता सा वेदपद्धतिनाम्ना निर्दिश्यते स्म । तत्र शिक्षणस्य अन्तिमं लक्ष्यं ज्ञानसम्पादनमात्रम् एव न आसीत् । यतः इह परत्र च जीवननिर्वहणस्य सज्जता एव शिक्षणस्य उद्देशः आसीत् तदा । किन्तु तत् कार्यम् आत्मज्ञानद्वारा करणीयम् आसीत् । गुरुकुलपद्धतिः गुरुशिष्यसम्बन्धम् अवर्धयत्, तथा च शिक्षककेन्द्रितां (अध्यापककेन्द्रितां) काञ्चित् पद्धतिं समस्थापयत्, यस्यां पद्धतौ छात्रेण कठोर-अनुशासनयुतं जीवनं यापनीयम् आसीत् । शिक्षकाणां विषये कतिपयानि उत्तरदायित्वानि अपि निर्वहणीयानि आसन् तेन ।

विश्वस्य सर्वप्रथमः विश्वविद्यालयः तक्षशिलायां क्रि.पू. ७०० वर्षावधौ संस्थापितः । नलन्दाविश्वविद्यालयः, यः तस्मिन् समये 'नलन्दामहावीर'नाम्ना निर्दिश्यते स्म सः, आरब्धः चतुर्थे शतके ( ४०० सा.श.) । सः विश्वस्य अतिश्रेष्ठविश्वविद्यालयेषु अन्यतमः आसीत् । सप्तमे शतके यदा सः विश्वविद्यालयः यशसः उत्तुङ्गशिखरे आसीत् तदा तत्र १०,००० छात्राः, २००० अध्यापकाश्च आसन् । तत्र विज्ञानं, खगोलविज्ञानं, चिकित्साशास्त्रं, तर्कशास्त्रम् इत्यादयः विभिन्नक्षेत्र सम्बद्धाः विभिन्नाः विषयाः तावता एव गाम्भीर्येण अवधानेन च पाठ्यन्ते स्म, यावता गाम्भीर्येण तत्त्वमीमांसा-दर्शन-सांख्य-योगशास्त्राणां, वेदानां, बौद्धधर्मस्य ग्रन्थानां, विदेशीयदर्शनानां च पाठनं प्रचलति स्म । जातीयाः राष्ट्रियाः च सीमाः अतिक्रम्य स्थितः सः नलन्दाविश्वविद्यालयः सुदूरेभ्यः चीना-इण्डोनेषिया-कोरिया-जापान-पर्शिया-टर्की-प्रभृतिभ्यः, अन्येभ्यः देशेभ्यः च छात्रान् विदुषः चापि आकर्षति स्म ।

चरकः, सुश्रुतः, आर्यभटः, भास्कराचार्यः, चाणक्यः, पतञ्जलिः, वात्स्यायनः, एतत्सदृशाः अन्येऽपि बहवः भारतीयविद्वांसः गणितं, खगोलविज्ञानं, भौतविज्ञानं, रसायनशास्त्रं, वैद्यकीयं शस्त्रचिकित्साशास्त्रं, ललितकलाः, यान्त्रिकतन्त्रज्ञानम्, उत्पादनाशास्त्रं, गृहनिर्माणादिसम्बद्धं विज्ञानं, तन्त्रज्ञानं, वास्तुकला, नौकानिर्माणं, नौपरिवहणं, क्रीडा, स्पर्धा इत्यादिषु विभिन्नेषु क्षेत्रेषु विश्वस्य ज्ञानपरम्परां प्रति स्वीयं योगदानम् अयच्छन् । स्वातन्त्र्यान्दोलनकाले गोखले, राममोहनरायः, पण्डितमदनमोहनमालवीयः, गान्धिवर्यः इत्यादयः बहवः नायकाः भारतीयानाम् उत्तमशिक्षणार्थं बहूनि कार्याणि अकुर्वन् ।

स्वातन्त्र्यप्राप्तिसमयादारभ्य अपि शिक्षणस्य प्रगतिविषयः भारतस्य विकासयोजनासु प्रथमस्थाने एव आसीत् । शिक्षणस्य गुणवत्तायाः वर्धनार्थं, शिक्षणे भागग्रहणार्थम्,

उन्नतस्तरीयस्य ज्ञानस्य प्राप्त्यर्थम्, आवश्यकयोः नियमाकार्यक्रमयोः रचनार्थं च भारतसर्वकारेण काले काले बहवः आयोगाः रचिताः अपि । तेषु प्रमुखाः आयोगाः - 'विश्वविद्यालयशिक्षण-आयोगः (१९४८-४९), माध्यमिकशिक्षण-आयोगः (१९५२-५३), शिक्षण-आयोगः (१९६४-६६), राष्ट्रियशिक्षक-आयोगः १ & २ (१९८३-८५) ।

शिक्षण-आयोगस्य निर्देशानाम् आधारेण विरचिता राष्ट्रियशिक्षानीतिः (१९६८) शिक्षणपद्धतेः आमूलाग्रपरिवर्तनं, सर्वेषु स्तरेषु शिक्षणस्य गुणवत्तायाः वर्धनं, विज्ञानतन्त्रज्ञानयोः अभिवृद्धिः, नैतिक-सामाजिकमौल्यानां कृषिः, शिक्षणजनजीवनयोः समीपसम्बन्धकल्पनम् इत्यादीनां विषयाणां प्रामुख्यं प्रत्यपादयत् । तथैव एषा शिक्षानीतिः शिक्षणं राष्ट्रियप्रगतेः, सामान्यनागरिकताज्ञानवर्धनस्य, सांस्कृतिकभाववर्धनस्य, राष्ट्रिय-एकतावर्धनस्य च कारणं यथा स्यात् तथा भूमिकाम् अरचयत् । राष्ट्रियशिक्षानीत्या (१९८६) (१९९२ तमे वर्षे संशोधिता) शिक्षणविषये - "जाति-मत-स्थान-लिङ्गादीनां भेदं विना सर्वेऽपि विद्यार्थिनः कञ्चित् एकं स्तरं यावत् तुलनात्मकं गुणात्मकं च शिक्षणं प्राप्नुयुः" इति परिकल्पना उपस्थापिता ।

१९७६ तमे वर्षे कृते ४२ तमे सांविधानिक-अधिनियमे राज्यसूचीतः शिक्षणस्य स्थानान्तरतां परिकल्प्य समवर्तिसूच्यां योजितम् । तत्र अस्माकं देशस्य सङ्घीयस्वरूपस्य महत्त्वस्य अवगमनं निरूप्य सामाञ्जस्यपूर्वकशिक्षणस्य लक्ष्याणां निर्णये राज्य-केन्द्रसर्वकारयोः द्वयोः अपि समानप्राधान्यं प्रतिपादितम् । शिक्षणनीतिः या कापि विरचिता भवतु, सा आन्तरक्षेत्रीयाणाम्, आन्तरमन्त्रालयीयानां च समग्रशिक्षणप्रक्रियाणां निरूपणे राज्यानामपि उत्तरदायित्वं महत्त्वपूर्णम् इति परिगणितम् । अस्याः नीत्याः अनुगुणं राष्ट्रियशैशवशिक्षणनीतिः २०१३, राष्ट्रिययुवनीतिः २०१४, राष्ट्रियकौशलविकास-औद्यमिकनीतिः २०१५ इत्यादीनाम् एतादृशीनां बह्वीनां राष्ट्रियस्तरस्य नीतीनां, राज्यस्तरस्य नीतीनां च प्रामुख्यं परिकल्पितम् ।

१९८६/९२ तमे वर्षे यदा राष्ट्रियशिक्षणनीतिः निरूपिता तदनन्तरं भारते विश्वे चापि महता प्रमाणेन परिवर्तनं जातम् । भारतस्य राजनैतिक-सामाजिक-आर्थिकविकासः तादृशीं गतिम् प्राप्नोत्, यस्यां सुदृढभविष्योन्मुखशिक्षणव्यवस्थायाः आवश्यकता दरीदृश्यते स्म । भारते शिक्षणक्षेत्रसम्बद्धा प्रगतिः सार्वभौमिकप्राथमिकशिक्षणेन सह सांविधानिकानां नियमानां, विधीनां च निरूपणेन सम्भवति । भारतस्य संविधानस्य २००२ तमवर्षीयः ८६ तमः अधिनियमः २१तमेन अनुच्छेदेन सह संयोजितः अस्ति । तदनुगुणं सर्वेभ्यः ६ तः १४ वयस्केभ्यः बालेभ्यः निश्शुल्कस्य अनिवार्यशिक्षणस्य चापि मौलिकाधिकारः प्रदीयते । राज्यस्य विधीनाम् अनुगुणं तस्याः नीत्याः निर्णयः क्रियते । 'बालेभ्यः निश्शुल्कस्य अनिवार्यशिक्षणस्य अधिकारः २००९ इत्येषः अधिनियमः (आर्.टी.ई २००७), यः भारतस्य संविधानस्य २१तमपरिच्छेदान्तर्गतत्वेन परिणामयुतक्रमेण प्रस्तूयते, वदति यत् भारतस्य सर्वेभ्यः ६ तः १४

वयस्केभ्यः बालेभ्यः प्राथमिकशिक्षणस्य समाप्तिपर्यन्तं समीपस्थे विद्यालये निश्शुल्कस्य अनिवार्यशिक्षणस्य च मौलिकाधिकारः वर्तते इति।

शिक्षणक्षेत्रे महत्त्वभूतानि परिवर्तनानि बहूनि जातानि सन्ति। अद्य शिक्षणस्य गतिविधयः, अध्ययनस्य प्रक्रियाः च कक्ष्यामात्रपरिमिताः न सन्ति। शिक्षणजगत् अपि केवलम् औपचारिकशिक्षणव्यवस्थापर्यन्तं उच्चतरशिक्षणपर्यन्तं वा परिमितं नास्ति। शिक्षणस्य प्रक्रियाः अपि अद्य न केवलं कक्ष्याधारितानां पाठ्यक्रमाणाम् आदानप्रदानेन प्रवर्तन्ते, अपि तु ताः मुद्रणद्वारा, विद्युन्माध्यमद्वारा, सूचना-निर्वहणतन्त्रज्ञानद्वारा, पुस्तकपत्रिकयोः द्वारा च प्रवर्तन्ते। अद्य अध्येतृभिः असङ्घटितमाध्यमादारभ्य सामयिकज्ञानपर्यन्तं सर्वम् उपलभ्यते।

अद्य नूतनज्ञानस्य सृष्टिः अनुप्रयोगश्चापि अत्यन्तं तीव्रगत्या वर्धमानौ स्तः। तदपि विज्ञानतन्त्रज्ञानयोः क्षेत्रे अत्यधिकप्रमाणेन। जनानां सामान्यजीवनस्य उपरि तेषां प्रभावः, ज्ञानतेजसा परिवर्तमानविश्वस्य परिचयस्य महत्त्वं विद्यार्थिभिः यदवगन्तव्यं तस्य विषयस्यापि महत्त्वपूर्णं स्थानं परिकल्पितम् अस्ति। प्रवर्धमानायाः ज्ञानाधारित-अर्थव्यवस्थायाः समाजस्य च आवश्यकतानां पूरणे समर्थानां जीवनकौशलानां ज्ञानेन सह मानवकौशलानां विकासस्य आवश्यकतायाः अपि अध्येत्रा जीवनपर्यन्तम् आधारभवनस्य ज्ञानस्य कौशालानां वा अध्ययनं करणीयम् इति विषये प्रोत्साहेन सह अनुच्छेदमपि करोति येन सः परिवर्तनैः सह कौशलैः सह च सामञ्जस्यं वर्धयितुं स्वस्य क्षमतायाः वर्धने अपि मतिं कुर्यात्। शिक्षणस्य परिवर्तमानसामाजिकपरिवेशाः, समानतायाः समावेशानां च लक्ष्याणां राष्ट्रियप्राथमिकतासाधनार्थं, सर्वेषां छात्राणां स्वस्य ज्ञानार्जनस्य अनुभवस्य च प्राप्त्यर्थम् अवसराणां वर्धनं यथा कुर्यात् तथा कर्तुं, सर्वेषां समतामूलशिक्षणस्य सुनिश्चितपरिणामार्थं, छात्राणां विविधसमूहानां ज्ञानार्जनस्य आवश्यकताः प्रति सर्वासां शिक्षणसंस्थानां क्रियाशीलत्वं कल्पयितुं चापि शिक्षणविषये परिवर्तितायाः दृष्टेः अपेक्षा क्रियते।

नूतनसूचनानां संवहनतन्त्रज्ञानानां च उपयोगः, विशेषतया अन्तर्जालक्षेत्रे, आ गतेभ्यः कतिपयेभ्यः वर्षेभ्यः आश्चर्यकररीत्या वर्धितः अस्ति। नूतनततन्त्रज्ञानं जनानां जीवनं, कार्यं, परस्परसम्पर्कं चापि परिवर्तयदस्ति। एतत् नूतनतन्त्रज्ञानम् अध्येतॄणां नूतनविषयभाण्डारं, नूतनान् अवसरान् च प्रकल्पयदस्ति। शिक्षणव्यवस्थायाम् एतस्य नूतनतन्त्रज्ञानस्य योजनकार्यं शिक्षणक्षेत्रे क्रियमाणेषु प्राथमिककार्येषु प्रमुखम् अस्ति।

अस्य उपर्युक्तस्य विकासस्य अयमर्थः यत् शिक्षणनीतीनां, शिक्षणवस्तुनः, प्रक्रियाणां च विकासः परिवर्तमानसमयस्य आवश्यकतायाश्च अनुगुणं करणीयः इति। पूर्वतनानाम् अनुभवानां, परिवर्तमानानां राष्ट्रियविकासलक्ष्याणां, सामाजिक-आवश्यकतानां च प्रकाशे भविष्यतः चिन्तनानाम् आवश्यकताः मनसि निधाय, तन्नाम बाल-युव-वयस्कानां परिवर्तमान-आवश्यकताभिः सह स्थानीय-राष्ट्रिय-क्षेत्रीय-वैश्विक-वास्तविकतानां परिवर्तनानि मनसि

संस्थाप्य, शिक्षणक्षेत्रे लक्ष्याणां, संरचनायाः, विषयवस्तुनः, प्रक्रियाणां च नूतनस्वरूपदानं चिन्तनीयम् । अस्य आवश्यकता अस्ति सुमहती । राष्ट्रियशिक्षानीतिः (२०१६ तमवर्षीया) भारते शिक्षणप्रक्रियाणां नूतनस्वरूपदानकार्यस्य मार्गदर्शकरूपेण रचिता अस्ति । सा अस्यां दिशि प्रयासरता अस्ति ।

२०१६ तमवर्षीया राष्ट्रियशिक्षानीतिः तादृशीं काञ्चित् विश्वासयोग्यां शिक्षणव्यवस्थां परिकल्पयन्ति, यस्यां सर्वेषां समानतया गुणावत्तायुक्तशिक्षणप्राप्तये, आजीवनं ज्ञानार्जनाय च अवसराणां सुनिश्चयः भवेत्, या च उत्पादकजीवनस्य यापने, देशस्य विकासप्रक्रियायां भागवहने, वेगेन परिवर्तमानस्य प्रतिपदं वैश्विकीभवतः, ज्ञानाधारितसमाजस्य आवश्यकतानां पूरणे, ज्ञान-कौशल-अभिवृद्धिमौल्यानां धारणे, समर्थानां विद्यार्थिनां स्नातकानां च सज्जीकरणे च समर्था स्यात्, या च भारतस्य विविधताम् अङ्गीकुर्वतां, भारतीयपरम्परा-संस्कृति-इतिहासादीनां सम्माननकर्तॄणां नागरिकाणां निर्माणे, सामाजिकसमरसतायाः धार्मिकबन्धुत्वस्य वर्धने च समर्था भवेत् । एषा दृष्टिः भारतस्य सामाजिक-आर्थिक-राजनैतिक-सांस्कृतिकविकासे शिक्षणस्य केन्द्रीयमहत्त्वस्य मान्यतां प्रदर्शयति । महात्मा गान्धिवर्यः उक्तवान् आसीत् यत् – “वास्तविकसमस्या एषा अस्ति यत् वास्तविकार्थे शिक्षणं नाम किम् इति जनानां ज्ञानमेव नास्ति । भूमेः मूल्यनिर्धारणं, विपण्यां वस्तूनां योग्यतानिर्णयः च येन प्रकारेण क्रियते तेनैव प्रकारेण वयं शिक्षणस्य मूल्यनिर्धारणं कुर्मः । विद्यार्थिनः अधिकाधिकम् अर्जयितुं समर्थाः येन भवेयुः तादृशमेव शिक्षणं दातुम् इच्छामः वयम् । वयं कदापि विद्यार्थिनां चारित्र्यवर्धनविषये चिन्तनं न कुर्मः“ इति । एतैः राष्ट्रपितुः वचनैः प्रेरणां प्राप्य एषा नीतिः मूल्ययुतशिक्षणदानस्य, प्रजानां कौशल-सामर्थ्ययोः वर्धनस्य, राष्ट्रविकासार्थं योगदानकरणस्य, छात्राणां सामर्थ्यवर्धनस्य च सर्वप्राथम्यं परिभावयति । एषा नीतिः अङ्गीकरोति यत् राष्ट्रस्य दीर्घकालिकी आर्थिकप्रगतिः विकासश्च शिक्षणव्यवस्थातः प्राप्यमाणानां छात्राणां गुणवत्तायाः आधारेण महत्त्वपूर्णं स्वरूपं प्राप्नोति इति । तथा च गुणवत्तायाः समानतायाः च आधारशिलायां स्थिता शिक्षणव्यवस्था निरन्तरविकासस्य, प्रवर्धमान-ज्ञानाधारित-अर्थव्यवस्थायाः, समाजे सफलताप्राप्तेः च मुख्यः आधारः भवति । एषा नीतिः शिक्षणं सामाजिक-आर्थिक-सक्रियतानिमित्तम् अत्यन्तं प्रभावपूर्ण-उपकरणरूपेण, समानतामूलस्य न्यायाधारितस्य मानवसमाजस्य निर्माणार्थं महत्त्वपूर्ण-उपकरणत्वेन च स्थितं मन्यते । एषा नीतिः समाजस्य एकीकरणशक्तिरूपेणापि शिक्षणं पश्यति । अस्याः नीतेः स्वीकारः सामाजिकसमरसतायाः राष्ट्रिय-अस्मितायाः च वर्धनं कुर्वतां मूल्यानां शिक्षणदानस्य भूमिकाम् अपि सहार्दम् अङ्गीकरोति । अस्याः दृष्टेः अयमपि अर्थः यत् उत्तमगुणवत्तायुतं शिक्षणं वैश्वीकरण-स्थानीयकरणयोः ऐक्यं सम्पादयति । तथा च भारतीयान् बालान् युवकान् च वैश्विकनागरिकान् कर्तुं साहाय्यम् आचरति, येषां मूलं भारतीयसंस्कृतिपरम्परायां गभीरतया अन्तर्हितं भवति ।

२०१६ तमवर्षीया राष्ट्रियशिक्षणनीतिः अग्रिमाणां कतिपयवर्षाणां निमित्तं भारते शिक्षणस्य विकासाय किञ्चित् स्वरूपं निर्दिशति । एषा नीतिः शिक्षणसम्बद्धाभिः पूर्वनिर्मिताभिः राष्ट्रियनीतिभिः निर्णीतेभ्यः लक्ष्येभ्यः उद्देशेभ्यः च अदूरे तिष्ठन्ती प्रवर्धमान-राष्ट्रिय-विकासः, शिक्षणक्षेत्रसम्बद्धसमस्याश्चेति द्वयोः दिशि अपि अवधानं ददाति । राष्ट्रियविकासे गुणवत्तायुक्तशिक्षणस्य महत्त्वम् अङ्गीकुर्वती एषा २०१६ तमवर्षीया राष्ट्रियशिक्षणनीतिः, सर्वेषु अपि स्तरेषु शिक्षणस्य गुणवत्ताम् अभूतपूर्वरूपेण अभिवर्धयितुं प्रयासं करोति । तथा च समाजस्य सर्वैरपि वर्गैः शिक्षणप्राप्तेः अवसरः प्राप्तव्यः इत्येतं विषयम् अपि चिन्तयति सा ।

श्रीअरबिन्दवर्यस्य शब्दाः एव अत्र अनूच्चार्यन्ते - "भारतस्य सर्वेषु अपि जनेषु एषः विश्वासः भवेत् यत् भारतस्य उत्थानम् अवश्यं भवेत्, भारतं महान् देशः भवेत् च इति । सर्वाः अपि घटितपूर्वघटनाः, सर्वमपि कष्टं, सर्वाः अपि प्रतिकूलपरिस्थितयः च अग्रे वर्धनाय सहायकाः एव । एषा रात्रिर्गमिष्यति । भविष्यति सुप्रभातम् । भारतस्य भाग्यसूर्यस्य उदयः भविष्यति । तथा च सः सूर्यः स्वप्रकाशेन समग्रं भारतं प्रकाशयिष्यति । ततः समग्रः एषियाखण्डः एव प्रकाशमानः भविष्यति । ततश्च समग्रं विश्वमेव प्रकाशयिष्यते । अग्रिमं २१तमं शतकं सम्पूर्णतया भारतस्य एव भवेत् ।"

### अध्यायः - २

# शिक्षणक्षेत्रे प्रमुखाः समस्याः

शिक्षणसम्बद्धासु पूर्वरचितासु नीतिषु यद्यपि स्पष्टतया उद्देशानां, लक्ष्याणां च निर्णयः कृतः, तथापि तेषु अधिकांशाः पूर्णतया कार्यरूपं नागताः एव । यद्यपि शिक्षणस्य प्रत्येकं स्तरस्य वर्धनदृष्ट्या, भागवहनदृष्ट्या च भारतेन महत्त्वपूर्णा प्रगतिः आसादिता, तथापि देशस्य शिक्षणक्षेत्रस्य विकासः मिश्रपरिणमयुक्तः एव दृश्यते । वर्तमानभारते शिक्षणं प्राप्तवन्तः, शिक्षणप्राप्तिनिमित्तम् उद्युक्ताः, दीयमानस्य शिक्षणस्य गुणवत्ता, शिक्षणे समानता, व्यवस्थागतकार्यकौशलं, प्रशासनप्रबन्धने, अनुसन्धानं, विकासः, शिक्षणस्य विकासार्थं वित्तीयबद्धता इत्यादिषु विषयेषु बह्व्यः समस्याः स्थिताः सन्दृश्यन्ते ।

**प्राप्तिः भागवहनं च -**

समग्रे जगति प्रवृत्तं संशोधनं शैशवशिक्षणस्य महत्त्वं प्रतिपादयति आधिक्येन । तथापि पूर्वविद्यालयशिक्षणे भागस्वीकर्तारः अतीव न्यूनसंख्याकाः । औपचारिकशिक्षणस्य प्राप्त्यर्थं बालानां सज्जतासम्पादनं, सर्वैः बालैः शैशवशिक्षणं यथा प्राप्येत तथा समानस्य अवसरस्य प्रदानं च प्रधानतया निर्वहणीयम् ।

आ २००० तमात् वर्षात् ६ तः १३ वयस्कानां विद्यालयम् अगच्छतां बालानां संख्या न्यूना जायमाना अस्ति । तथापि अद्यापि विद्यालयम् अगच्छतां संख्या अधिका अस्ति एव । प्राथमिकशिक्षणेन सह तोलयामः चेत् उच्चप्राथमिक-माध्यमिकविद्यालयेषु नामाङ्कनं कुर्वतां संख्या न्यूना इत्येषः विषयः अपि अवधानार्हः । प्राथमिकस्तरतः उच्चप्राथमिकस्तरं प्रति, उच्चप्राथमिकस्तरतः माध्यमिकस्तरं प्रति, माध्यमिकस्तरतः महाविद्यालयस्तरं प्रति, ततः (तृतीयस्तरतः) विश्वविद्यालयस्तरस्य शिक्षणं प्रति अग्रे अग्रे अध्ययनस्य अनुवर्तनम् अद्यापि समस्यात्मकमेव जातम् अस्ति ।

विश्वे उन्नतशिक्षणप्रणाल्यां भारतं द्वितीयस्थाने अस्ति । यद्यपि भारतीय-उच्चशिक्षणेन उन्नतस्तरे पादार्पणं कृतमस्ति तथापि उन्नतशिक्षणे नामाङ्कनम् अतीव न्यूनमेव दृश्यते । २०१४-१५ वर्षे तत् २३.६ प्रतिशतम् आसीत् । २०१७-१८ वर्षाभ्यन्तरे तत् २५.२ प्रतिशतं प्रति वर्धनीयमिति निश्चयः कृतः अस्ति । तदनन्तरस्य लक्ष्यम् अस्ति - २०२०-२१ वर्षे तत् ३० प्रतिशतं भवेदिति ।

अशिक्षितानां संख्यायाः न्यूनीकरणे अपेक्षितक्रमेण प्रगतिः न जाता इत्येषः अपि चिन्तनस्य विषयः एव । अशिक्षितानां संख्या भारते एव अत्यधिकप्रमाणेन अस्ति । २०११ तमे वर्षे ७ वर्षवयसः अपेक्षया अधिकवयस्कानाम् अशिक्षितानां संख्या २८२.६ मिलियन्-मिता आसीत् । विश्वे अत्यधिसंख्याकाः अशिक्षिताः युवानः, प्रौढाश्च भारते एव सन्ति । २०११ तमे वर्षे शिक्षितयुवकानां संख्या (१५ तः २४ वयः) ८६.१ प्रतिशतं, शिक्षितप्रौढानां संख्या (१५ वयसः अधिकम्) ६९.३ प्रतिशतं च आसीत् ।

**गुणवत्तासम्बद्धाः विषयाः -**

शिक्षणस्य गुणवत्तायाः न्यूनता अपि कश्चन चिन्तनीयः विषयः एव । यतः अग्रे तस्य असन्तोषकरस्य ज्ञानार्जनस्य परिणामः सम्मुखीकरणीयः भविष्यति । अपरिष्कृतः पाठ्यक्रमः, अध्यापकानां संख्यायां न्यूनता, अप्रभाविन्यः शिक्षणपद्धतयः इत्यादयः गुणवत्तासम्बद्धाः न्यूनताः अपि पूर्वविद्यालयशिक्षणसम्बद्धा काचित् प्रमुखा समस्या एव । पूर्वविद्यालयशिक्षणं समापितवतां बालानां प्राथमिकविद्यालयेषु नामङ्कनावसरे अपि बहूनां बालानां संज्ञानात्मक-भाषाक्षेत्रीयविद्यालयं प्रति गमने सामर्थ्यं न भवति । अधिकांशाः पूर्वविद्यालयशिक्षकाः पर्याप्तमात्रेण प्रशिक्षिताः न भवन्ति । बहुषु विषयेषु पूर्वविद्यालयपाठ्यक्रमस्य प्राथमिकविद्यालयस्य पाठ्यक्रमात् अधोमुखविस्तारः जातः भवति ।

विद्यालयशिक्षणे महती समस्या नाम विद्यार्थिनाम् अध्ययनस्य असन्तोषकरस्तरसम्बद्धा अस्ति । राष्ट्रिय-उपलब्धि-सर्वेक्षणेन तृतीय-पञ्चम-अष्टम-दशम-वर्गाणां समग्रसर्वेक्षणं यदा कृतं तदा ज्ञातं यत् बहूनां विद्यार्थिनाम् अध्ययनस्तरः अपेक्षितप्रमाणेन नास्ति इति । प्राथमिकेषु उच्चप्राथमिकेषु च विद्यालयेषु पाठनकौशलस्य न्यूनगुणवत्ता माध्यमिकस्तरस्य विद्यार्थिनां पठनप्रक्रियायाः उपरि प्रभावं जनयति । माध्यमिकस्तरस्य न्यूनगुणवत्ता महाविद्यालय-विश्वविद्यालयस्तरपर्यन्तमपि प्रभावं जनयति । तस्मात् उच्चशिक्षणक्षेत्रे अपि न्यूनगुणवत्तायाः प्रभावः सम्मुखीकरणीयः भवति ।

विद्यालयीयशिक्षणस्य न्यूनगुणवत्तायाः भवन्ति बहूनि कारणानि । तेषु कतिपयानि यथा – विद्यालयीय शिक्षणार्थं निर्धारितानां नियमानां स्तराणि च पालनं येषु तृप्तिकरं न भवति एतादृशानां विद्यालयानां सङ्ख्यायाम् आधिक्यम् । विद्यार्थिनाम् अध्यापकानां च अनुपस्थितिः, अध्यापकानां प्रेरणादानस्तरे क्षीणता, प्रशिक्षणस्य अभावः, तस्य परिणामकारिरूपेण अध्यापने अपेक्षितगुणवत्तायां न्यूनता, शिक्षणे सूचना-संवहनतन्त्रज्ञानानाम् उपयोगे न्यूनता, प्रबन्धकानाम् अपेक्षितप्रमाणेन अनुपयोगः, निरीक्षणनिष्पादनादिषु निरीक्षितप्रमाणेन प्रबन्धव्यवस्थायाम् अनवधानम् इत्यादयः । गुणवत्तायुक्तशिक्षणस्य दाने सर्वकारीयविद्यालयानाम् एतत् असाफल्यं बहूनां सर्वकारीयेतरविद्यालयानाम् आरम्भस्य कारणं जातम् । तेषु विद्यालयेषु अपि अध्ययनपरिसरस्य, प्रशिक्षितशिक्षकाणाम्, आधारभूतशिक्षणस्य च अभावः वर्तते एव ।

अधिकेषु उच्चशिक्षणसंस्थानेषु प्रदीयमानस्य शिक्षणस्य गुणवत्ताविषयः अपि चिन्ताजनकः एव । भारते १९९४ तमे वर्षे उच्चशिक्षणस्य स्तरमापनार्थं, गुणवत्तायाः निर्णयार्थं च उपायत्वेन प्रत्यायनप्रतिनिधिसंस्थाः आरब्धाः । राष्ट्रिय-मूल्याङ्कन-प्रत्यायनपरिषदा १४० विश्वविद्यालयानां सर्वेक्षणं कृतम् । तेषु ३२ प्रतिशतं विश्वविद्यालयाः 'ए'स्तरं (प्रथमश्रेणीम्) प्राप्तवन्तः । तया एव परिषदा २,७८० महाविद्यालयानां सर्वेक्षणं कृतम् । तेषु ९ प्रतिशतं महाविद्यालयाः 'ए'स्तरं प्राप्तवन्तः । ६८ प्रतिशतं विश्वविद्यालयेषु, ९१ प्रतिशतं महाविद्यालयेषु च राष्ट्रिय-मूल्याङ्कन-प्रत्यायनपरिषदा निर्धारितगुणवत्तायाः अपेक्षया न्यूनगुणवत्ता दृश्यते स्म । सर्वकारीयेतरशिक्षणसंस्थाः शिलीन्ध्रवत् प्रसृताः सन्ति । परन्तु तेषु अपि अधिकानां संस्थानां गुणवत्ता अतीव न्यूना एव । रिक्तानां पदानां सुयोग्यैः अपूरणम्, बहुषु सार्वकारीयेतरशिक्षणसंस्थासु, सार्वजनिक-उच्चतरशिक्षणसंस्थासु च आधारभूतशिक्षणस्य न्यूनता, विविधतायुक्त-अर्थव्यवस्थया सह कौशलानां योजनार्थम् अपेक्षिस्य पाठ्यक्रमस्य नवीकरणे क्षीणप्रगतिः, संशोधनार्थम् अभिवृद्ध्यर्थं चापि अपेक्षितायाः वित्तव्यवस्थायाः अपर्याप्तता च उच्चशिक्षणक्षेत्रे समस्यानां सम्मुखीकरणस्य कारणानि सन्ति ।

**कौशालं नियोजनं च -**

विश्वे अधिकयुवजनसंख्यायुक्तेषु राष्ट्रेषु भारतम् अस्ति अन्यतमम् । अस्याः ५४ प्रतिशताधिका जनसंख्या ऊनपञ्चविंशतिवयस्कानामेव । अनेन सिद्धं यत् शिक्षणस्य प्रशिक्षणस्य च माध्यमेन भारतस्य युवजनसमुदायः ज्ञानकौशलाभ्यां सुसज्जः यदि क्रियेत तर्हि अस्माकं देशस्य कार्यबलं विशेषतः वर्धयितुं शक्यम् इति । किन्तु खेदस्य विषयः नाम तेषां यूनां निमित्तं तान्त्रिक-व्यावसायिकशिक्षणसम्बद्धानां कार्यक्रमाणाम् आयोजने अद्यापि अपर्याप्तता दृश्यते इति । कौशलविकासस्य व्यावसायिकक्षेत्रे औपचारिकरूपेण योजनं, विद्यार्थिनाम् ऊर्ध्वमुखवर्धनाय अवसरकल्पनं, व्यावसायिककार्यनिष्पादनार्थं शासनसमानतायाः कल्पनाय प्रयासः इत्यादयः इदमिदानीम् आरब्धाः सन्ति । उच्चगुणवत्तायुक्तानां प्रशिक्षणानाम् आयोजनं, सामाजिकैः अपि तस्य स्वीकारे आसक्तिः यथा दर्श्येत तथा मनोभावस्य वर्धनं कर्तुं प्रयासः च अधिकतया अपेक्षितः ।

अस्माकं विद्यालयेषु शिक्षणं प्राप्य बहिरागच्छत्सु बहवः स्वकौशलानुगुणम् उद्योगं प्राप्तुं न अर्हन्ति । समुचितस्य उद्योगस्य महान् अभावः दरीदृश्यते । तस्मात् अस्माकम् उच्चशिक्षणव्यवस्थायामेव विश्वासः न्यूनः जायमानः अस्ति । योग्यस्य उद्योगावसरस्य प्राप्तिः न भवति इत्यतः अस्माकम् उच्चशिक्षणस्य उपयोगिताविषये एव प्रश्नः उद्भवति । बहवः स्नातकाः, स्नातकोत्तरपदवीधराः च स्वीये क्षेत्रे उद्योगं न प्राप्नुवन्ति । महता अवधानेन उच्चशिक्षणं प्राप्तवताम् उद्योगकल्पनसामर्थ्यस्य विषये चिन्तनीयम् अस्ति ।

**पाठ्यक्रमः मूल्याङ्कनं च -**

वचनमेतत् व्यापकतया श्रूयमाणः अस्ति यत् वर्तमानविद्यालयीयस्य उच्चशिक्षणपाठ्यक्रमस्य, महता वेगेन परिवर्तमाने विश्वे उत्तमस्य उद्योगस्य प्राप्तेः, जीवननिर्वहणार्थम् अपेक्षितानां प्रासङ्गिककौशलानां वर्धनाय अपेक्षितस्य पाठ्यक्रमस्य च सम्बन्धस्य अभावः गम्भीररूपेण उपस्थितः अस्ति इति । उद्योगस्य उद्यमस्य च निमित्तम् अपेक्षितप्रासङ्गिककौशलानां पाठनाय, अध्येतारं जनम् इतोऽप्यधिकसर्जनात्मकं नवोन्मेषशालिनं च कर्तुं, विश्लेषणात्मकचिन्तनाय, प्रभावितया सम्पर्ककरणाय, स्वतन्त्रतया समस्यानां सम्मुखीकरणाय अपेक्षितानां कौशलानां वर्धनाय, व्यक्तिम् उत्तरदायित्ववन्तं नागरिकं कर्तुं, सांस्कृतिकविविधतां मनसि निधाय सद्भावपूर्वकं व्यवहर्तुं, सर्वैः सह मिलित्वा कार्यं कर्तुं वस्तुं चापि समर्थानां कौशलानां वर्धनार्थं च अवसरकल्पनमपि काचित् प्रमुखा समस्या एव । विद्यालय-महाविद्यालय-विश्वविद्यालयेषु स्थिता मूल्याङ्कनप्रक्रिया अपि समग्रतया अतृप्तिकरी एव अस्ति । बहुषु प्रसङ्गेषु मूल्याङ्कनं विद्यार्थिनाम् अध्ययनं विषयज्ञानं च आधृत्य एव क्रियते । तादृश्याः मूल्याङ्कनपद्धतेः सम्पूर्णतया नूतनस्वरूपप्रकल्पनम् अपि अत्यावश्यकं, यस्यां पद्धत्यां विद्यालयीयविषयज्ञानं, पाठ्येतरविषयज्ञानं चेति उभयविधम् अपि विषयम् अवलम्ब्य विद्यार्थिनां समग्रमूल्याङ्कनं भवेत् ।

**सूचना-संवहनतन्त्रज्ञानम् -**

सूचना-संहवन-तन्त्रज्ञानं गतेषु कतिपयेषु दशकेषु महता प्रमाणेन प्रगतिम् असाधयत् । तद्विषये देशे एव बहवः प्रयोगाः कृताः सन्ति । शिक्षणे तस्य उपयोगार्थमपि महदेव ज्ञानभाण्डारं तत्र सञ्चितम् अस्ति । तथापि तस्य तन्त्रज्ञानस्य उपयोगः शिक्षणक्षेत्रे पूर्णरूपेण क्रियमाणः नास्ति । इदानीमपि सूचनासंवहन तन्त्रज्ञानस्य उपयोगः शिक्षणक्षेत्रे अत्यल्पप्रमाणेन एव क्रियते । शिक्षणस्य गुणवत्तायाः वर्धनार्थं तन्त्रज्ञानस्य उपयोगः अत्यावश्यकः एव ननु ।

**अध्यापकविकासः प्रबन्धनव्यवस्था च -**

अध्यापकानां गुणवत्तायाः कार्यसामर्थ्यस्य च वर्धनार्थं निरन्तरप्रयत्नाः यद्यपि कृताः, तथापि विद्यालयीय-अध्यापकानाम् आरम्भिकव्यावसायिकसन्नाहः, निरन्तरव्यावसायिकविकासः च इत्येषा पद्धतिः अत्यन्तन्यूनतायुक्तपद्धतिः इति मन्यते । अपेक्षितानां नूतनोत्तरदायित्वानां निर्वहणार्थम् अध्यापकानां सज्जीकरणं, विविधतायुक्तेषु सामाजिक-आर्थिक-सांस्कृतिक-तान्त्रिकपरिसरेषु कार्यनिर्वणसामर्थ्यस्य वर्धनार्थम् अध्यापकशिक्षणस्य, प्रशिक्षणस्य वा आयोजनं चापि पर्याप्तमात्रेण न सम्भवदस्ति । सांस्थिकसामर्थ्यस्य, अपेक्षितानाम् अध्यापकानां संख्यायाः च महान् भेदः अस्ति । तस्मात् कारणात् अध्यापकानाम् अभावः जायते । भारतस्य पूर्वभागे एषा समस्या अतिगम्भीरा जाता अस्ति, यत्र च अप्रशिक्षिताध्यापकानां महान् समूहः एव अस्ति ।

एतेषु राज्येषु प्रशिक्षितानाम् अध्यापकानां सामर्थ्यमपि अतिन्यूना एव भवति । अध्यापकशिक्षणे अपि अनुसन्धानस्य, प्रयोगाणां, नवोन्मेषकार्याणां चापि परिमितिः भवति । एतेषाम् अभावानां कारणतः अध्यापकानां वृत्त्यभिज्ञानस्य, अध्यापकवृत्तेः स्तरस्य च न्यूनता जायमाना अस्ति । अध्यापनस्य परिणामानां वर्धनार्थं शिक्षकाणां सामर्थ्य-प्रेरणा-उत्तरदायित्वसम्बद्धेषु विषयेषु अधिकम् अवधानं दातव्यम् ।

**समानतायाः विषयाः -**

यद्यपि पूर्वविद्यालयशिक्षणे नामाङ्कनं कुर्वतां संख्यायां पर्याप्तमात्रेण प्रगतिः साधिता, तथापि आनुकूल्यहीनाः बालाः (निर्धनाः) अद्यापि पूर्वविद्यालयशिक्षणात् वञ्चिताः सन्ति एव । आर्थिकरूपेण दुर्बलानां बालानां प्राथमिकपूर्वशिक्षणप्राप्तेः अवसरः अतीवन्यूनः भवति ।

बहुषु राज्येषु उल्लेखनीया प्रगतिः साधिता स्यात् चेदपि उच्चप्राथमिक-माध्यमिकविद्यालयेषु नामाङ्कनं राष्ट्रियमानकस्य अपेक्षया अतीव न्यूनम् अस्ति इति तु अभ्युपगन्तव्यम् एव । यद्यपि माध्यमिकशिक्षणं प्राप्नुवतां सङ्ख्या अधिका जाता, तदनुगुणं माध्यमिकविद्यालयानां संख्या अपि वर्धिता, तथापि आभारतं माध्यमिकशिक्षणस्य प्रसारे विषमता तु दृश्यते एव । स्थानीय-असमानतया सह छात्राणां सामाजिक-आर्थिकपृष्ठभूमिः अपि बाधिका भवति इत्यतः अद्यापि बहवः शिक्षणप्राप्तौ सौलभ्यं न अनुभवन्ति ।

२००० तमवर्षस्य अनन्तरं विद्यालयम् अगच्छतां संख्यायां यद्यपि न्यूनता जाता, तथापि केषुचित् राज्येषु राष्ट्रियमानकस्य अपेक्षया अपि विद्यालयम् अगच्छतां संख्या अधिका एव अस्ति । ओ.ओ.एस्.सि.-अनुपातानुसारम्, अनुसूचितजाति-अनुसूचितजनजाति-मुस्लिमबालानां विद्यालयगमने अत्यल्पता दृश्यते । एतस्मात् स्पष्टं भवति यत् तेषां बालानां विषये विशेषतया अधिकम् अवधानं दातव्यम् इति ।

उच्चशिक्षणे नामाङ्कनं कृतवतां संख्यायामपि स्थानीयाः असमानताः अधिकाः सन्ति । २०११-१२तमे वर्षे उच्चशिक्षणार्थं नामाङ्कनं झारखण्डराज्ये ८.४ प्रतिशतं, चण्डीगढे ५३ प्रतिशतं च जातम् अस्ति । एतादृश्यः सामाजिक-असमानताः अपि अवगन्तव्याः । २०१४-१५ तमे वर्षे आहत्य उच्चशिक्षणे जातं नामाङ्कनं २३.६ प्रतिशततः अपि न्यूनम् अस्ति (बालकानां २४.५%, बालिकानां २२.७%, अनुसूचितजातेः १८.५%, अनुसूचितजनजातेः १३.३%) । भारते उच्चशिक्षणविभागेन सम्मुखीक्रियमाणा समस्या - समानता विस्तारः च कथं साधनीयः इति ।

बहूनि राज्यानि प्राथमिकशिक्षणे आनुकूल्यवञ्चितजनसमूहानां नामाङ्कनकारणं, तेषां जीवने आनुकूल्यकल्पनं च विभिन्नानां कार्यनीतीनां द्वारा यशस्वितया अकुर्वन् । एतादृशेषु बहुषु प्रयत्नेषु सत्सु अपि, विकलाङ्गबालाः, सुदूरेषु स्थानेषु निवसतां बालाः, प्रवासिजनानां बालाः, अन्ये असुरक्षित-लाभवञ्चितजनानां बालाः इत्यादयः शिक्षणप्राप्तेः अवसराणां लाभं पूर्णप्रमाणेन प्राप्तुम्

अशक्ताः एव सन्ति । नगरेषु अपि निर्धनबालानां तादृशानाम् अन्येषां च विद्याभ्यासे सहभागिता अल्पा एव । सर्वाधिक-अभावग्रस्तवर्गाणां शिक्षणप्राप्तौ आनुकूल्यकल्पनं, सर्वेऽपि यथा आरम्भिकं माध्यमिकं चापि शिक्षणं प्राप्नुयुः तथा करणं चापि सर्वप्रथमप्राधान्यम् अपेक्षते ।

राष्ट्रिय-शिक्षण-उपलब्धि-सर्वेक्षणस्य अनुसारं राज्यशासनयुक्तानां केन्द्रशासनयुक्तानां च प्रदेशानां छात्राणां स्तरे महान्तः भेदाः दृश्यन्ते । नगरवासिनां छात्राणां प्रगतिः ग्रामीणच्छात्राणां प्रगतेः अपि उत्तमा भवति । सर्वकारीयेतरविद्यालयानां छात्राणां प्रगतिः सर्वकारीयविद्यालयानां छात्राणां प्रगतेः अपेक्षया उत्तमस्तरीया भवति । सामान्यवर्गाणां छात्राणां प्रगतिः अनुसूचितजाति-जनजातिवर्गाणां छात्राणां प्रगतेः अपेक्षया उत्तमस्तरीया भवति । सर्वेक्षणमेतत् “शिक्षणे समानता” इत्यस्य लक्ष्यस्य साधनामार्गे विद्यमानां समस्यां प्रदर्शयति । समाजस्य ऐतिहासिकलाभवञ्चिताः, निर्धनानां वर्गाणां बालाः, वंशश्रेण्यामेव प्रथमतया अध्ययनार्थम् उद्युक्ताः बालाः च अध्ययने न्यूनफलितांशं प्रदर्शयन्ति ।

सामान्यतया विकलाङ्गबालाः, विशेषावधानापेक्षावन्तः बालाः च बाह्यविद्यालयानां बालानां संख्यायाः प्रमाणेन एव सन्ति । ये विकलाङ्गाः, विशेषावधानापेक्षिणः, सामाजिकशैक्षणिक-आनुकूल्येभ्यः वञ्चिताः च, तेषां समस्यानां परिहारार्थं तदनुगुणानां विद्यालयानाम् आरम्भस्य आवश्यकता अपि अस्ति ।

अध्ययनम् असमाप्य एव विद्यालयत्यागं कुर्वतां समाजस्य सर्ववर्गीयाणां बालानां संख्या महती एव अस्ति इत्येषः अपि अवधातव्यः अंशः । तत्रापि सामाजिक-आर्थिक-लाभवञ्चितानां जनसमूहानां बालानां, विशेषतया तत्रापि तेषां जनसमूहस्य बालिकानां विद्यालयत्यागप्रमाणं राष्ट्रियप्रातिशत्यापेक्षया अत्यधिका अस्ति । अयमंशः ज्ञापयति यत् सामाजिक-आर्थिक-लाभवञ्चितानां जनसमूहानां बालानां विद्यालयत्यागस्य निवारणार्थम् उपायानाम् आरम्भस्य महती आवश्यकता अस्ति इति ।

राज्यानि केन्द्रशासनयुक्तप्रदेशाश्च मिलित्वा शिक्षणमाध्यमेन स्त्री-पुरुष-असमानतायाः न्यूनीकरणे उल्लेखनीयां प्रगतिम् असाधयन् । तत्रापि विशेषतया प्राथमिक-उच्चप्राथमिकविद्यालयेषु स्त्री-पुरुष-समानता साधिता । तथापि उच्चमाध्यमिकविद्यालयेषु महती असमानता अद्यापि वर्तते एव । बह्व्यः बालिकाः विद्यालयं प्रति न प्रेष्यन्ते एव । तादृश्यः अपि बालिकाः बह्व्यः सन्ति, याः माध्यमिकशिक्षणं प्राप्तवत्यः, परन्तु उच्चमाध्यमिकशिक्षणं महाविद्यालयशिक्षणं वा प्राप्तुम् असमर्थाः । विद्यालयेषु, तत्रापि माध्यमिकविद्यालयेषु, तासाम् अध्ययनस्य अवरोधाः भवन्ति बहवः, ये च ताः बालिकाः अध्ययनात् निवारयन्ति बहुधा । ये प्रयासाः सामाजिकवर्गाणां समानताकल्पनार्थं, स्त्री-पुरुष-असमानतायाः निवारणार्थं च क्रियमाणाः सन्ति तेषां वेगः इतोऽपि वर्धनीयः अस्ति । सकेन्द्रितकार्यनीतीनाम् अनुष्ठानस्य अपि आवश्यकता वर्तते । बालिकानां, विशेषावधानापेक्षिणां बालानां प्रभावयुतानां समावेशानाम्

आयोजनस्य, तत्र तेषां सहभागित्वस्य, तेषाम् आनुकूल्यकल्पनस्य च आवश्यकता महती एव अस्ति।

प्रौढसाक्षरतायां, युवसाक्षरतायां च विद्यमाना स्त्री-पुरुष-असमानता अपि काचित् प्रमुखा समस्या एव। भारते युवसाक्षरतायां स्त्री-पुरुष-असमानता (८.२%) अधिका अस्ति। २०११ तमे वर्षे स्त्रीपुरुषजनसंख्यायां (१५-२४ वयस्कानाम्) युवसाक्षरता पुरुषाणां ९० प्रतिशतं, स्त्रीणां ८१.८ प्रतिशतं च आसीत्। येषु देशेषु प्रौढशिक्षणे स्त्रीपुरुष-असमानता १९.५ प्रतिशतादपि अधिका अस्ति तेषु भारतम् अपि अन्यतमम्। भारते २०११ तमे वर्षे प्रौढसाक्षरता (१५ अधिकवयस्कानाम्) पुरुषाणां ७८.८ प्रतिशतं, स्त्रीणां ५९.३ प्रतिशतं च आसीत्। अनेन स्पष्टं भवति यत् बालिकानां महिलानां च शिक्षणस्य वर्धनार्थम् इतोऽपि अधिकाः प्रयत्नाः अवश्यमेव विधेयाः इति।

**दक्षताव्यवस्था -**

यद्यपि शिक्षणस्य आरम्भिकस्तरे माध्यमिकस्तरे च मध्ये एव विद्यालयत्यागं कुर्वतां संख्या न्यूना जाता, तथापि आरम्भिकशिक्षणस्य समाप्तितः पूर्वमेव बहवः बालाः विद्यालयत्यागं कुर्वन्तः सन्ति। २०१४-१५ तमे वर्षे प्राथमिकस्तरे विद्यालयत्यागं कुर्वतां प्रमाणं ८३.७ प्रतिशतम् आसीत्। आरम्भिकशिक्षणदृष्ट्या एतत् प्रमाणं ६७.४ प्रतिशतात् न्यूनम्। तन्नाम प्रथमवर्गे नामाङ्कनं कृतवत्सु १० बालेषु ४ बालाः चतुर्थवर्गस्य प्राप्त्यभ्यन्तरे एव विद्यालयत्यागं कुर्वन्ति। माध्यमिकस्तरे विद्यालयत्यागं कुर्वतां प्रमाणे विशेषावधानापेक्षिणां बालानां, सामाजिक-आर्थिक-आनुकूल्यवञ्चितानां बालानामेव आधिक्यम्। यद्यपि समाजस्य सर्ववर्गाणां बालानामपि मध्ये एव विद्यालयत्यागः चिन्तनविषयः एव तथापि सामाजिक-आर्थिक-लाभवञ्चितजनसमूहानां बालानां प्रमाणं, तत्रापि तत्रत्यानां बालिकानां प्रमाणं राष्ट्रियप्रतिशत्यापेक्षया अपि अत्यधिकम्। अयमंशः सामाजिक-आर्थिक-लाभवञ्चितानां जनसमूहानां बालानां विद्यालये एव रक्षणार्थम् उपायानां चिन्तनस्य आवश्यकतां प्रदर्शयति। नामाङ्कनं कृतवतां सर्वेषां बालानां प्राथमिक-माध्यमिक-उच्चमाध्यमिक-शिक्षणस्य समापनार्थम् अपेक्षितानाम् आनुकूल्यानां प्रकल्पनं सर्वप्रथमं करणीयेषु कार्येषु अतिप्रमुखम्।

**शासनं प्रबन्धनं च -**

बहूनि अध्ययनानि शिक्षणे शासनसम्बद्धानां समस्यानाम् उल्लेखम् अकुर्वन्। उदाहरणार्थम् – शिक्षकाणाम् अभावः, विद्यालय-महाविद्यालय-विश्वविद्यालयेभ्यः दीयमानस्य धनराशेः विलम्बेन प्राप्तिः, शासनात्मकम् असामर्थ्यम् इत्यादिकम्। परिणामकारिकार्यक्रमाणां योजना, तासां योजनानां कार्यान्वयनसम्बद्धासु व्यवस्थासु अवरोधाः चापि प्रमुखतया दृश्यन्ते। अस्मात् कारणात् नियोजितानां कार्यक्रमाणां कार्यान्वयनं न भवति। शिक्षणसंस्थानां शासने, प्रबन्धने, निर्वहणे च तत्रापि उच्चशिक्षणस्तरे वित्तीयविधिषु, पोषकेषु कार्यक्रमेषु च संख्याबाहुल्यात्

समस्याः अपि अधिकाः जायमानाः सन्ति । यद्यपि एतत् सत्यमस्ति यत् कतिपयेषु राज्येषु प्रोत्साहात्मकप्रयत्नाः, नूतनप्रबन्धनव्यवस्थाः च उपकल्पिताः सन्ति, तथापि देशस्य एतत्क्षेत्रीयं प्रगतिचित्रं तु साफल्यवैफल्यमिश्रितम् एव अस्ति । केन्द्रीयव्यवस्थानियमैः सह स्थानीयस्तरे अपि व्यवस्थाकल्पनं, प्रबन्धनियमानां संरचनम् इत्यादिषु विषयेषु पौनःपुन्येन विषयविमर्शः अत्यावश्यकः अनिवार्यः चापि ।

विद्यालयीयस्य उच्चविद्यालयशिक्षणस्य च वाणिज्यीकरणम् अपि अधिकतया प्रवर्तते । अयमंशः सर्वकारीयेतरशिक्षणसंस्थासु प्रवेशार्थं शुल्करूपेण दीयमानस्य धनराशेः अवलोकनेन ज्ञायते । तादृशीनाम् अवमानजनकशिक्षणसंस्थानाम् आधिक्यं शिक्षणव्यवस्थायाः विश्वासार्हतां न्यूनीकरोति ।

**अनुसन्धानं विकासश्च -**

भारतस्य विश्वविद्यालयेषु संशोधनसम्बद्धः विकासः अतीव दुर्बलः एव । सद्यः विद्यमानानां विभागसदस्यानां कौशलवर्धनार्थम्, अध्यापन-संशोधनयोः मध्ये सक्रियतायाः वर्धनार्थं च द्वयोः अपि क्षेत्रयोः उत्कृष्टतायाः प्रोत्सहनं करणीयम् अस्ति । संशोधनस्य गुणवत्तायाः वर्धनार्थं समग्रे जगति विद्यमानाभिः संस्थाभिः सह, विभागैः सह वा गम्भीरतया अधिकाधिकं कार्यं कर्तुम् उच्चशिक्षणसंस्थाभ्यः, तत्रत्यविभागसदस्येभ्यः च प्रेरणा-प्रोत्साह-साहाय्यादिकं दातव्यम् । तेषाम् अन्ताराष्ट्रीयत्वसम्पादनार्थं संशोधनसम्बद्धानां विषयाणां सर्जनार्थं च आनुकूल्यकल्पनं, ज्ञानविकासप्रक्रियाणां वेगवर्धनं, संशोधनसंस्थानाम् उद्योगजगता सह विश्वविद्यालयविभागानां सम्बन्धकल्पनम् इत्यादिषु विषयेषु प्रयत्नाः परिमिततया एव प्रचलति ।

**आयव्ययनिर्बन्धाः -**

शिक्षणक्षेत्रे विद्यमानम् अपर्याप्त-आर्थिकसाहाय्यं शिक्षणस्य आनुकूल्यवर्धने, गुणवत्तायुक्तशिक्षणस्य दाने च बाधां जनयति । बहूनि अध्ययनानि शिक्षणस्य शासनव्यवस्थायां विद्यमानानां समस्यानाम् उल्लेखम् अकुर्वन् । तेषु अध्ययनेषु विद्यालय-महाविद्यालय-विश्वविद्यालयेभ्यः दीयमानस्य धनराशेः विलम्बेन प्राप्तिरेव उदाहरणत्वेन प्रस्तुतम् अस्ति । पूर्वतनशिक्षणनीतिषु शिक्षणाय न्यूनतमव्ययत्वेन सकलगृहीयायस्य (जीडीपी) प्रतिशतं षष्ठः भागः (६ %) विनियोक्तव्यः इति उल्लिखितम् अस्ति । तथापि तस्य लक्ष्यस्य प्राप्तिः तु कदापि न जाता एव । विद्यालय-प्रौढशाला-उच्चविद्यालयेषु शिक्षणसम्बद्धानां कार्यक्रमाणां वर्धनार्थं, शिक्षणे गुणवत्ताम् उत्तमस्तरं प्रापयितुं, रूपितानां कार्यक्रमाणां कार्यान्वयनार्थं च शिक्षणनिधेः न्यूनता बाधां जनयति । यथासमयं कार्यक्रमाणां कार्यान्वयने अपि व्यापकरूपेण निरन्तरं वैफल्यं जायमानम् अस्ति । अस्य परिणामरूपेण प्रदत्तसम्पत्तेः अपि अपेक्षानुगुणम् उपयोगः न जायते ।

**वैश्विकप्रतिबद्धता -**

२०३०तमवर्षीयस्य जागतिकसुस्थिराभिवृद्धेः चतुर्थलक्ष्यस्य (एस्.डि.जी.-४) कार्यसूच्यां सर्वेषां समानस्य, न्यायसम्मतस्य, गुणवत्तायुक्तस्य च शिक्षणस्य निश्चयाय, आजीवनम् अध्ययनावकाशस्य प्रोत्साहस्य दानाय च प्रयत्नः कृतः । २००० वर्षे आरब्धायां कार्यसूच्यां विद्यमानानाम् अंशानां, विशेषतया प्रौढ-युवसाक्षरता, मध्ये एव विद्यालयत्यागं कुर्वन्तः बालाः, आरम्भिकबालनिरीक्षणं, शिक्षणे अननुकूलता, कौशलविकासे अपर्याप्ताः अवसराः, शिक्षणस्य अतृप्तिकरी गुणवत्ता, छात्राणाम् अध्ययनस्तरसम्बद्धाः कार्यसूच्यः इत्यादीनां, पूर्णतया कार्यान्वयनम् अद्यावधि न जातम् । अतः एषा शिक्षणनीतिः अजातकार्यान्वनानाम् ई एफ् ए कार्यसूचीनाम्, एस् डी जी ४ सम्बद्धानां लक्ष्याणाम् अनुवर्तनं करोति ।

शिक्षणमाध्यमेन सम्मुखीक्रियमाणाः समस्याः, नूतनदृष्टीनाम् आत्मसात्करणस्य निरन्तरप्रयत्नानां च आवश्यकताम् अपेक्षन्ते, येन सौलभ्यार्थं साम्यतार्थं चापि कमपि सन्धिम् अनाश्रित्य एव शिक्षणस्य विकासाय, गुणवत्तायुक्तशिक्षणस्य चापि प्रोत्साहः दत्तः भवेत् । भारते शिक्षणस्य अभिवृद्ध्यर्थं विभिन्नानां समस्यानां निवारणार्थं च प्रभावयुतानां कार्यनीतीनां संरचनं, देशस्य “जनसंख्यासम्बद्धलाभांशा”नां सामर्थ्यस्य सदुपयोगकरणं चापि मुख्योद्देश्ये अन्तर्भवति ।

## अध्यायः - ३

# दृष्टिः, लक्ष्यम्, उद्देशाश्च

**विषन् (दृष्टिः) -**

२०१६ तमवर्षीया राष्ट्रियशिक्षणनीतिः (एन्.ई.पि.) तादृश्याः विश्वसनीयायाः उच्चप्रदर्शनकारिण्याः च व्यवस्थायाः विषये चिन्तयति, यस्यां सर्वेषां समानं गुणवत्तायुक्तं शिक्षणं प्राप्तुम् आजीवनम् अवसरकल्पनं, वेगेन परिवर्तमानस्य वैश्वीयकरणस्य, ज्ञानाधारित-आर्थिकव्यवस्थायाः, समाजस्य आवश्यकतानां च निमित्तं ये ज्ञान-दक्षता-भाव-मूल्ययुक्ताः अपेक्षिताः, तादृशानां छात्राणां स्नातकानां वा सज्जीकरणं चापि अन्तर्भवति ।

**मिषन् (उद्देशः) -**

- सर्वेभ्यः बालक-युव-प्रौढेभ्यः न्यायसम्मत-समान-गुणवत्तायुक्तशिक्षणप्रापणार्थम् आजीवनम् अवसरनिश्चयः, समानतया उत्कृष्टतया च सह राष्ट्रस्य मानवीयान्तश्शक्तेः उपलब्ध्यर्थं प्रोत्साहदानम् ।
- विद्यालयशिक्षणेन उच्चशिक्षणेन च सह बालेभ्यः, युवभ्यः, प्रौढेभ्यः चापि शिक्षणकार्यक्रमाणाम् आयोजनं, येन बाल-युव-प्रौढमनस्सु भारतस्य समृद्धसम्पत्तेः, गौरवमय-अतीतस्य, महतीनां परम्पराणां, विभिन्नसंस्कृतेः च विषये जागरूकता उत्पादिता भवेत्, यत्र च सर्वेषु अपि स्तरेषु अध्येतृणां ज्ञानार्जनार्थं प्रोत्साहः स्यात्, येन ते उत्तरदायिनागरिकता, शान्तिः, सहनशीलता, धर्मनिरपेक्षता, राष्ट्रिय-एकता, सामाजिकसाहचर्यं, सर्वधर्मेषु समभावः इत्यादिभिः सह सार्वत्रिकमूल्यानां वर्धने, वैश्विकनागरिकतायाः वर्धने, निरन्तरविकासे च सहायकाः भवेयुः ।
- पाठ्यक्रमः, अधिगमसामग्र्यः, शिक्षाशास्त्रीयक्रियाविधयः, अधिगममूल्याङ्कनं, शिक्षकस्य गुणवत्ता, कार्यप्रदर्शनम् इत्यादिषु विषयेषु अधिक-अवधानदानेन सह गुणवत्तायुक्तशिक्षणस्य प्रोत्साहः, सर्वे छात्राः शिक्षणस्य सर्वेषु अपि स्तरेषु विशिष्ट-अधिगमपरिणामप्राप्तौ (ज्ञान-कौशाल-आचार-मूल्येषु) यत् सामर्थ्यम् अपेक्षितं स्यात् तस्य वर्धनस्य दृष्ट्या संस्थागतनेतृत्वस्य प्रबन्धनस्य आवहनं, देशस्य विकासार्थं, प्रवर्धमानवैश्विकसमस्यानां सम्मुखीकरणे सहभागित्ववहनार्थं, यशस्वितया जीवननिर्वहणार्थं च सफलजीवनयापनस्य आवश्यकता अस्ति महती ।
- कार्यार्थम्, उद्यमार्थं च अपेक्षितानां कौशलानां शिक्षणेन सह औद्योगिककौशलं, तान्त्रिककौशालं चापि तत्सम्बद्धकौशलानां ग्रहणार्थम् अध्येतृणां प्रोत्साहः । केवलं कण्ठपाठकरण-अध्ययनं विना अधिकाधिकरचनात्मकता, स्वतन्त्रतया समस्यापरिहारः, विवेचनात्मकदृष्ट्या चिन्तनं,

प्रभावितया संवहनम् इत्यादीनां कौशलानां वर्धनस्य प्रोत्साहः भवेत्, येन सः राष्ट्रस्य विकासप्रक्रियायां योगदाने समर्थः भवेत्।

**लक्ष्यम् उद्देशाश्च –**

लक्ष्यशिक्षायाः गुणवत्तायाः प्रोत्साहनं, प्रासङ्गिकता**याः** अभिवर्धनं, भारतीयशिक्षाव्यवस्थायाः विश्वसनीयतायाः अभिवृद्धिः, विद्यालयशिक्षायाम्, उच्चतरशिक्षाप्रणाल्यां च सफलतां गतानां छा**त्रा**णां नियोजनीयतायाः परिष्कारः, आ प्रारम्भिकात् बाल्यकालतः तार्तीयकशिक्षापर्यन्तं समानावसरोपलब्धेः सुनिश्चिततासम्पादनस्य, यत्र तान्त्रिकशिक्षणस्य, व्यावसायिकशिक्षणस्य, प्रशिक्षणस्य, (टि.वि.ई.टि.) आजीवनाध्ययनस्य च अवसरः प्राप्येत तादृशस्य, प्रोत्साहनं, समाजस्य सर्वाणि अपि क्षेत्राणि शैक्षिकावसरं प्राप्नुयुः इ**त्य**स्य सुनिश्चततासम्पादनं च।

दृष्टिम् (विषन्) उद्देशं (मिषन्) च साधयितुम् अर्हस्य शिक्षणस्य प्रमुखानि लक्ष्याणि अधोनिर्दिष्टप्रकारकाणि -

- आनुकूल्यवञ्चितानां वर्गेण सम्बद्धानां बालानां विषये विशेषावधानं दत्त्वा प्राथमिकशिक्षणे सुगमतया भागं वोढुं चतु:पञ्चवर्षीयाणां सर्वेषां पूर्वप्राथमिकस्तरीयाणां बालानां कृते आवश्यकस्य अधिगमस्य विकासात्मकस्य च सन्नाहस्य उपस्थापनं सुनिश्चितं कर्तुं प्रारम्भिकबाल्यावस्थाशिक्षाव्यवस्थाया: विस्तारणम्।
- सार्वभौमिकस्य प्राथमिकस्य माध्यमिकस्य च शिक्षणस्तरस्य उपस्थापनं, तथैव माध्यमिकशिक्षणं प्राप्तवान् बाल: उच्चतरमाध्यमिकशिक्षणं विनायासं यथा प्राप्नुयात्, उच्चतरमाध्यमिकशिक्षां लब्धवान् छात्र: अग्रिमाध्ययनस्तरं न्यायसम्मततया यथा अधिगच्छेत्, सर्वे नामाङ्कनवन्त: विद्यार्थिन: स्वस्य अध्ययनस्य समापने समर्था: यथा भवेयु: तथा तेषां साहाय्यस्य आचरणं, येन ते अपेक्षितं ज्ञानार्जनस्तरं प्राप्तुं प्रभवेयु:।
- अवसरात् वञ्चितानां छात्राणां, विशेषत: वैयक्तिकम् अवधानं येभ्यः देयं तेषां किशोराणां, युवकानां, विभिन्नै: अङ्गवैकल्यै: ग्रस्तानां छात्राणां च विषये विशेषावधानं दत्त्वा बालानां युवकानां च विविधसमूहानाम् आवश्यकतानां पूर्त्यै सर्वे कार्यक्रमा: सुलभा: समावेशशीला: प्रतिस्पन्दशीला: च भवेयु: इत्यस्य अंशस्य सुनिश्चिततासम्पादनं, तथैव नामाङ्कनं कृतवतां सर्वेषां विद्यार्थिनां कृते ज्ञानार्जनस्तरस्य व्यवस्थापने साहाय्यस्य परिकल्पनम्।
- शिक्षणे सामाजिकस्य क्षेत्रीयस्य लिङ्गाधारितस्य वा भेदभावस्य समाप्ति: स्यात्, शिक्षणव्यवस्थाकारणत: लिङ्गाधारितसमानता बालिका-महिलाशक्ततावर्धनं च स्यात् च इत्येतस्य सुनिश्चिततासम्पादनम्।
- उद्योगयोग्यतायै, स्वोद्यमसंस्थापनाय, सदा परिवर्तमानस्य कार्यजगत: आनुगुण्येन आत्मन: सज्जीकरणाय च अपेक्षितस्य तन्त्रज्ञानस्य व्यावसायिककौशलस्य च विकासाय अवसरस्य वर्धनं,

जीवनयापनाय कार्यकरणाय च अपेक्षितस्य कौशलस्य दाक्ष्यस्य च अर्जनस्य सामर्थ्यं युवसु ज्येष्ठेषु च स्यात् इत्यस्य निश्चिततासम्पादनम् ।

- अर्थव्यवस्थासम्बन्धे अनौपचारिकक्षेत्रे कार्यं कुर्वाणान् अविहाय औपचारिकशिक्षणप्रणालीत: बहिर्भूतानां यूनां (15-24 वर्षवयस्कानां) वयस्कानां (अधिकपञ्चदशवर्षीयाणाम्) च उद्योगयोग्यतासम्पादनाय कौशलं प्रदत्तं स्यात्, अवसरश्च उपलब्ध: स्यात् इत्येतस्य सुनिश्चिततासम्पादनम् ।
- तन्त्रज्ञानीयं व्यावसायिकं च शिक्षणक्षेत्रम् अविहाय तार्तीयीके शिक्षाक्षेत्रे सामरस्यस्य सुलभतां सुनिश्चितां कर्तुम् उच्चशिक्षाप्रणाल्यां परिष्कारस्य सम्पादनम्, उच्चशिक्षाया: उपलब्धौ सामूहिक्या: असमानताया: न्यूनीकरणम्, अध्ययनक्षेत्रे अनुसन्धानक्षेत्रे च परिष्कार:, नवसंशोधनप्रवृत्ते: प्रोत्साहनं, सर्वासु उच्चतरशिक्षणसंस्थासु नवज्ञानस्य सृष्ट्यर्थं विशिष्टशिक्षणपरिणामं प्राप्तुम्, उद्योगयोग्यं कौशलम् आसादयितुं च सर्वे प्राप्तप्रवेशा: छात्रा: क्षमा: यथा स्यु: तथा करणं च ।
- शिक्षणे, विशेषत: शिक्षणप्रदाने परिष्कार:, अधिगम-अध्यापनप्रक्रियायां गुणवत्ताया: वृद्धिः स्यात्, अध्यापकानां प्रशिक्षणस्य शिक्षणस्य आयोजनस्य, शिक्षणस्य प्रबन्धनस्य च सुदृढीकरणाय सूचनासञ्चारप्रौद्योगिक्याः (ऐ.सी.टी) संवृद्धेः सुनिश्चिततासम्पादनम् ।
- शिक्षकाणां योग्यतायां व्यावसायिकविकासे अध्यापकानां विकासप्रबन्धनप्रणाल्यां परिष्कारस्य सम्पादनस्य सुनिश्चिततासम्पादनं, येन अर्हतावतां सुसमर्थनां च शिक्षकाणां ये च निर्धारितस्तरानुगुणं सामर्थ्यं वहेयु:, शिक्षकाणां निमित्तं निश्चितेन व्यावसायिकेन मानकेन युक्ता: स्यु:, आपूर्ति: पर्याप्ततया उपलभ्येत इत्येतस्य सुनिश्चिततासम्पादनम् ।
- सर्वे युवान:, वयस्केषु 90% जना: (पुरुषा:, महिलाश्च) च वयस्कशिक्षणकार्यक्रमद्वारा निश्चितां साक्षरतां, गणनाकौशलं च प्राप्नुयु: इत्येतस्य सुनिश्चिततासम्पादनम् ।
- शिक्षणस्य योजनायां, अभिशासने प्रबन्धने च प्रतिस्पन्दशीलसहभागात्मिकाया: उत्तरदायित्वोपेताया: च प्रणाल्या: संस्थापनं, तथैव राष्ट्रिये, उपराष्ट्रिये स्थानीये च स्तरे शिक्षणक्षेत्रस्य आयोजनाय, प्रबन्धनाय, शैक्षिकयोजनासम्बद्धायां प्रबन्धनसम्बद्धायां च क्रियात्मिकायाम् अवसंरचनायां परिष्कारस्य सम्पादनं, वर्धमानानां शिक्षणक्षेत्रीयाणाम् अपेक्षाणां विषये उत्तरदायित्वपूर्णस्य प्रतिस्पन्दस्य उपस्थापनं च ।
- सांस्थिकनेतृत्वस्य क्षमताया: व्यावसायिकतासम्पादनं, राष्ट्रिये, उपराष्ट्रिये स्थानीये च स्तरे सांस्थिकस्तरे च शिक्षणक्षेत्रे नेतृत्वस्य परिष्कृतताया: सम्पादनं, येन शिक्षाक्षेत्रीयानां वर्धमानानां शैक्षणिकप्राथमिकतानाम् अभियाचनानां समुचितम् उत्तरं प्राप्तं स्यात् इत्येतस्य अंशस्य सुनिश्चिततासम्पादनम् ।

- शैक्षणिकविकासात्मककार्यक्रमाणां निमित्तं सुलक्षितस्य अधिकीकृतस्य च वित्तीयप्रबन्धस्य सुनिश्चिततासम्पादनम् ।

भाविन्या: शिक्षणकार्यसूच्या: निर्देशनम् आजीवनं तिष्ठन्तीनां क्षेत्रव्यापिनीनां सम्भावनानां सुदृढ: आधार: भवितुम् अर्हति । एतस्यां नीतौ प्रशिक्षणार्थिनां द्वारा, मुक्त-दूरस्थादिप्रणालीनां द्वारा, औपचारिकाणाम् अनौपचारिकाणां च अधिगमसंसाधनानां च माध्यमेन च अर्जितानाम् अधिगमानां परिणामानां मान्यतां प्रमाणनं च सुनिश्चितीकृत्य कार्यजगते अपेक्षितानां कौशलानां प्रशिक्षार्थिनाम् इच्छाया: क्षमताया: च अनुसारम् अधिगमस्य विभिन्नानां मार्गाणाम् उपलब्धये शिक्षाक्षेत्रस्य व्यापकताया: परिकल्पनस्य विषये चिन्तनं कृतम् अस्ति ।

**अध्यायः - ४**

# नीते: संरचना

पूर्वतनेषु विभागेषु अस्माभि: काचित् दृष्टि: प्राप्ता अस्ति । तत्र दृष्टे:, कार्याह्वानस्य, कार्यनीते: च उद्देशा: स्थूलतया विवृता: सन्ति, येषां च साकारता विशिष्टया कार्ययोजनया कर्तुं शक्येत । एतत् कार्यं तु आ बहुभ्य: वर्षेभ्य:, केषुचित् विषयेषु आ बहुभ्य: दशकेभ्य: च चलत् एव अस्ति । अत: अस्माभि: शैक्षणिकदृष्ट्या राज्यानां विशालतां मनसि निधाय विभिन्नानां राज्यानाम् आन्तरिक्या: उपव्यवस्थाया: अभिज्ञानं परिग्रहणीयम् । एतत् अतिरिच्य अन्य: कोऽपि परिहार:, मार्गः वा नास्ति, यश्च मार्गप्रदर्शकपरिवर्तनं विदधानः प्रवेश-समावेश-उत्कृष्टतादिरूपाणां स्पर्धाह्वानानां सम्मुखीकरणे समर्थः स्यात् । एतस्या: नीते: प्रमुख: विषय: गुणवत्तायुक्तशिक्षणस्य प्राधान्यं भवेत् इति । यतः अस्माकं देश: विशालताया: विस्तृतताया: समावेशनस्य च वृद्ध्यर्थं क्रियमाणस्य कार्यस्य साक्षिरूपेण स्थित: अस्ति । नियोजनीयता महत्याः चिन्ताया: विषय: अस्ति, यत्र अत्यधिकतया अवधानं दातव्यम् अस्ति । वैश्विकपरिवर्तनैः प्रौद्योगिकीयौन्नत्त्या च विविधोद्देश्यानाम् अभिप्राप्त्यर्थं पुन: नूतनानि कानिचन क्षेत्राणि अस्माकं पुरतः उपस्थापितानि सन्ति ।

यत्र सर्वकारीये, केन्द्रीये, राज्य-सङ्घीये, राज्यक्षेत्रीये स्थानीये च स्तरे एकैकस्य अपि क्षेत्रस्य निमित्तं कार्यान्वयनं, कार्यनीति: च संसूचिता भवेत् तादृशी कार्यस्य रूपरेखा सज्जीक्रियते । विशेषतया राज्यसर्वकाराः स्थानीयसर्वकाराः च २०१६ तमवर्शीयायाः राष्ट्रियशिक्षानीतेः अनुगुणं कार्यनीतिं कार्ययोजनां च कर्तुं यथा शक्नुयुः तथा प्रोत्साह: दास्यते ।

अग्रिमभागेषु प्रत्येकस्मिन् खण्डे प्रमुखाणां क्षेत्राणां विषये करिष्यमाणानां कार्याणां विषये च अधिकं वक्तव्यं नास्ति, यत: एष: एव अन्तिम: निर्णय: न, अन्यविधानि अपि कार्याणि अत्र भवितुम् अर्हन्ति येषां च विषये अग्रे चिन्तनं कर्तुं शक्येत ।

## 4.1 शालापूर्वशिक्षणम्

पूर्वं शालापूर्वशिक्षणस्य आवश्यकताया: विषये अधिकम् अवधानं दातुं न शक्तम् । यत: सर्वकारीया: विद्यालया: पूर्वप्रारम्भिकशिक्षणं न यच्छन्ति । महिला-बालविकासमन्त्रालयेन बालविकाससेवाकार्यक्रमे (ऐ.सि.डि.एस्.) प्रारम्भिकबाल्यशिक्षणस्य व्यवस्थापनाय आदेश: दत्त: । एतत् तु सार्वत्रिकरूपेण अङ्गीकृतम् अस्ति यत् बाल्यावस्था तु महत्त्वपूर्णा अस्ति, यत्र बालानां मानसिकतया दैहिकतया च विमर्शात्मकं वर्धनं भविष्यति इति ।

अधोलिखिताः नीतिक्रमाः विषयेऽस्मिन् अनुष्ठास्यन्ते -

1. महिला-बालविकामन्त्रालयस्य सहयोगेन 4-5वर्षीयाणां बालानां कृते शालापूर्वशिक्षणस्य व्यवस्था करिष्यते ।
2. अद्यत्वे तु ऐ.सि.डि.एस्.योजनायाम् अन्तर्गतासु शिशुशिक्षणशालासु (अङ्गनवाडी इत्याख्येषु) शालापूर्वशिक्षणं दातुं पर्याप्तमात्रेण आनुकूल्यानि न सन्ति । शिशुशिक्षणकेन्द्रेषु शालापूर्वशिक्षणं दातुम् एकवर्षाभ्यन्तरे पाठ्यक्रमस्य, अध्ययनसामग्र्याः च निर्माणं करिष्यते । तेन सह कार्यकर्तॄणां कृते प्रशिक्षणं दातुं राज्यैः सह समालोच्य पदानि निक्षेप्तव्यानि सन्ति ।
3. राज्यसर्वकारैः पूर्वप्राथमिकशालानाम् अध्यापकानां कश्चन गण: निर्मातव्यः । तदर्थं तेषां कृते प्रशिक्षणं दास्यते । शिशुशिक्षणत: पूर्वप्राथमिकशिक्षणपर्यन्तं निर्बाधतया शिक्षणव्यवस्थां कर्तुम् एतेन गणेन परिश्रम: करिष्यते ।
4. गच्छता कालेन शालापूर्वशिक्षणं, पूर्वप्राथमिकशिक्षणं, प्राथमिकशालाशिक्षणम् इत्यादीनां शिक्षणव्यवस्था अविच्छिन्नतया यथा प्रचलेत्, शालावरणे एव शिशुशिक्षणकेन्द्राणि यथा भवेयु: इत्येतदर्थं परिश्रम: प्रचलिष्यति ।
5. स्वायत्तसंस्थाभिः चाल्यमानानां शिशुशिक्षणकेन्द्राणां सुयोग्यनिर्वहणाय नियन्त्रणाय च नियमा: निर्णीता: भविष्यन्ति ।

### 4.2 बालकिशोरशिक्षणाधिकारस्य संरक्षणम्

बालाधिकारस्य संरक्षणं, बालानां व्यक्तिगतसुरक्षाम् अपि उपेक्ष्य क्रियमाणं शारीरकदण्डनं, भावनात्मकं दैहिकं वा उत्पीडनं यथा न स्यात् तथा जागरूकतावहनं, विद्यालयीयकार्यावसरे बालाः क्षतग्रस्ताः यथा न भवेयुः तथा अवलोकनम्, सुरक्षाविषये अवधानं, बालानुकूलायाः भाषायाः व्यवहारस्य च प्रयोगः, भेदभावरहित्यं, शारीरकशोषणनिवारणं, मादकपदार्थानां सेवनस्य अवरोध: इत्यादय: अत्र अन्तर्भवन्ति । एतदर्थम् उत्तमवातावरणस्य निर्माणं भवेत् । बालाधिकारस्य उल्लङ्घनविषये शून्यसहिष्णुतामयी दृष्टिः अवलम्बयिष्यते, येन बालानां शारीरकी मानसिकी च सुरक्षा सुनिश्चिता भवेत् ।

एतदर्थम् अधोलिखिता: केचन नियमा: स्वीकरिष्यन्ते -

1. बालानां शालासुरक्षता, सरक्षणं, दिशानिर्देशं च कर्तुं कश्चन विभाग: करिष्यते । मान्यताया: पञ्जीकरणस्य च निमित्तं शिक्षणसंस्थानाम् अर्हतानियमाः रूपयिष्यन्ते ।
2. अध्यापकानां शिक्षणप्रशिक्षणकार्यक्रमाणां द्वारा पुनश्चर्यापाठ्यक्रमद्वारा च प्रधानाचार्य:, अन्ये अध्यापका: च बालाधिकाराणाम् उल्लङ्घनेन किं भवेत् इति अंशं यथा जानीयु: तथा अधिनियमाः, नियमाः, विनियमाः इत्यादीनां विषये जागरूकतावहनं ज्ञापयिष्यते ।
3. किशोरशिक्षणकार्यक्रमाः राष्ट्रिययजनसङ्ख्याशिक्षणकार्यक्रमाः च चरणबद्धक्रमेण पाठ्यक्रमेषु समायोजयिष्यन्ते ।

4. किशोरशिक्षणविषयः माध्यमिकशालाशिक्षकाणां पूर्वप्रशिक्षणे सेवाकालीनप्रशिक्षणकार्यक्रमे च नियोजयिष्यते ।
5. छात्राणाम्, अध्यापकानां, पोषकाणां च लाभार्थं बालाधिकारसम्बद्धाः ई-विद्याभ्यासकार्यक्रमाः सज्जीकरिष्यन्ते ।
6. वर्धमानैः बालकैः बालिकाभिः च सम्मुखीक्रियमाणानां किशोरावस्थासम्बद्धानां समस्यानां परिहाराय पालकानां शिक्षकाणां च कृते वैयक्तिकतया परामर्शं दातुं विद्यालयेषु प्रशिक्षितानाम् आप्तमार्गदर्शकानां नियुक्तिः करिष्यते ।

### ४.३ विद्यालयशिक्षणे अधिगमस्य परिणामाः

प्राथमिकशिक्षणे दृश्यमानः दुर्बलः अधिगमपरिणामः महत्याः चिन्तायाः विषयः अस्ति । एषु दिनेषु प्रवृत्तानि अध्ययनानि ज्ञापयन्ति यत् विद्यालयशिक्षणे बालैः पठन-लेखन-अङ्कगणितसम्बद्धानि सामान्यानि कौशलानि अपि अधिगतानि न दृश्यन्ते इति । राज्यसर्वकाराः अधिगमपरिणामानां मौल्यमापनाय प्राथमिकस्तरीयाणां पठन-लेखन-अवगमन-गणितीयकार्यक्रमेषु वृद्धेः सम्पादनाय च कृतोद्यमाः दृश्यन्ते । किन्तु एतेषु सर्वेषु प्रयासेषु सत्सु अपि दुर्बलः अधिगमपरिणामः तु चिन्ताकरः एव दृश्यते । अतः राज्यसर्वकारैः केन्द्रसर्वकारेण च अधिगमपरिणामेषु विशेषपरिष्कारः अवश्यमेव चिन्तनीयः, येन प्राथमिकशिक्षणक्षेत्रे गुणवत्तावृद्धिः अवश्यमेव भवेत् ।

एतदर्थम् अधोलिखिताः नीतिनियमाः अनुसरिष्यन्ते -

1. आर्.टि.ई.-अधिनियमे निर्धारितानाम् अवसंरचनामानकानि अतिरिच्य अपि अधिगमपरिणामसम्बद्धानि मानकानि सज्जीकरिष्यन्ते, स्वायत्तेषु सर्वकारीयेषु च विद्यालयेषु तानि समानतया अन्वितानि करिष्यन्ते च ।
2. आर्.टि.ई.-अधिनियमद्वारा निर्धारितानां मानदण्डानाम् आधारेण राज्यानि स्थानीयस्थितेः स्थानीयानुकूल्यस्य च अनुगुणतया स्वीयाः योजनाः कर्तुं लब्धावसराणि तु सन्ति एव । यदि आवश्यकता स्यात् तर्हि आर्.टि,ई.-अधिनियमे एव अपेक्षितं परिवर्तनं विधाय अवसरेभ्यः आधिक्येन वञ्चितानां विस्थापितबालकानां, कठिनपरिस्थितौ विद्यमानानां च निमित्तं स्थानीयपरिस्थितेः आनुगुण्येन वैकल्पिकविद्यालयानां स्थापनाय मानदण्डः निश्चेष्यते ।
3. अनुत्तीर्णतारहितव्यवस्थायाः परिष्कारः करिष्यते, यतः एषा व्यवस्था बालानां शैक्षणिकसामर्थ्यस्य वर्धने नितरां बाधिका एव दृश्यते । अनुत्तीर्णतारहिता व्यवस्था पञ्चमकक्ष्यान्तमेव स्थास्यति, उच्चप्राथमिकस्तरे योग्यतारहितानां बालानाम् अनुत्तीर्णता अनुमंस्यते । सतत-व्यापक-मूल्याङ्कनव्यवस्थाम् (सि.सि.ई) अवलम्ब्य शैक्षणिकतया दुर्बलान् छात्रान् अभिज्ञाय तेभ्यः परिहारबोधनव्यवस्था अनुष्ठास्यते ।

4. विद्यालयेषु शैक्षणिकगुणस्तरस्य वर्धनाय, शैक्षणिकसहायतामाध्यमेन बालानां साहाय्यं कर्तुं व्यवस्थायाः निर्माणाय, ई-संसाधनादीनां बह्वायामवतां व्यवस्थापनाय च सुदृढानि पदानि निक्षेप्स्यन्ते ।

## ४. ४ विद्यालयीयशिक्षणम्

सार्वभौमिकप्रारम्भिकशिक्षा (यु.ई.ई.) वास्तविकतोपेता अस्ति इत्यतः माध्यमिकशिक्षायाः विस्तारः तावत् अपरिहार्यः । एतदर्थं सर्वेषाम् अर्हच्छात्राणां समायोजनं कर्तुं, संस्थानां स्थितिं प्रबन्धनं च अपरिगणय्य निर्धारितमानकं मनसि निधाय माध्यमिकविद्यालयप्रणाल्यां विकासः सम्पादनीयः अवश्यमेव । माध्यमिकस्तरे छात्राणां तत्परतासम्पादनम्, अग्रिमकक्ष्यां प्रति गच्छतां सङ्ख्यायां वृद्धेः सम्पादनं च महतः कष्टस्य विषयः जातः अस्ति । वर्तमानशिक्षाप्रणाली अनेकाभिः विकृतिभिः कदाचारैः च कलुषिता जाता दृश्यते । कैश्चित् राज्यैः निष्पक्षपातततया पारदर्शिकतया च परीक्षा सञ्चाल्यते इत्येतत् सत्यमेव चेदपि समग्रायां परीक्षाप्रणाल्यां महान् परिष्कारः तु अत्यावश्यकः एव ।

एतदर्थम् अधोलिखिताः नीतिनियमाः अनुसृताः भविष्यन्ति -

1. सर्वाणि अपि राज्यानि अल्पच्छात्रसङ्ख्यावतां समुचितानुकूल्यरहितानां च विद्यालयानाम् अभिज्ञानाय महता प्रमाणेन प्रयासं कुर्युः । यत्र शक्येत तत्र मानवशक्तेः, भौतिकशक्तेः संरचनाशक्तेः च सदुपयोगाय, उत्तमशैक्षणिककार्यप्रदर्शनाय, प्रभाविप्रबन्धनद्वारा इष्टस्य उपयोगस्य प्राप्त्यै च अव्यावहारिकविद्यालयाः संयुक्तविद्यालयेषु अन्तर्भावयितुं प्रयासः विधास्यते । यदा विद्यालयानाम् अन्तर्भावः भवेत् तदा एकस्मिन् एव स्थले तयोः स्थितिः स्यात् । राज्यैः सह समालोच्य आर्.टि.ई.-अधिनियमेषु शैथिल्यम् असम्पाद्य एव विलयनाय संयुक्ततासम्पादनाय च दिशानिर्देशाः सज्जीकरिष्यन्ते । एतत् संयुक्ततासम्पादनम् अचिरप्राप्यमाणे भविष्यत्काले 'एका कक्ष्या, एकः अध्यापकः' इत्येतां परिकल्पनां साकारीकर्तुं समर्थं भविष्यति ।
2. आर्.टि.ई.-अधिनियमस्य १२ (१) (ग) खण्डस्य अनुसारं याभिः सर्वकारीयम् अनुदानं स्वीकृतं स्यात् तासाम् अल्पसङ्ख्याकीयसंस्थानां (भाषासम्बद्धानां मतसम्बद्धानां च) विस्तारव्यवहाराणां परीक्षणं विधास्यते, आर्थिकतया दुर्बलानां विस्तृतां राष्ट्रियप्रतिबद्धतां मनसि निधाय ।
3. राज्यानि समुचितवयोवर्गपर्यन्तम् आर्.टि.ई.नियमं विस्तारयितुं प्रयासं कुर्युः, येन माध्यमिकशिक्षणमपि तत्र समाविष्टं स्यात् ।
4. विद्यालयशिक्षायां सर्वेषु अपि स्तरेषु आनुकूल्यानां छात्रपरिणामस्य च परिकल्पनाय न्यूनतममानकं निर्णेष्यते ।
5. केन्द्रीयविद्यालयानां (के.वि.) जवाहरनवोदयविद्यालयानां (ज.न.वि) च विस्तारः सम्पादयिष्यते । तथैव शैक्षिकतया पृष्ठवर्तिनां जनपदानां प्राथमिकतां मनसि निधाय

कस्तूहबागान्धिबालिकाविद्यालयानां (केजिबिबि) विस्तारः माध्यमिकस्तरपर्यन्तं करिष्यते, उन्नतीकरणं च विधास्यते । ज.न.विद्यालयानां सफलतायाः कारणानाम् अध्ययनं करिष्यते, राज्यानां द्वारा पुनरावर्तयिष्यते च ।

6. अध्ययनं परित्यक्तवन्तः, उद्योगादिषु निरताः च बालाः पूर्णसमयं यावत् औपचारिकविद्यालयेषु उपस्थातुम् असमर्थाः सन्तोऽपि अध्ययनम् अनुवर्तयितुं यथा शक्नुयुः तथा मुक्तविद्यालयशिक्षणव्यवस्थायाः विस्तारः सम्पादयिष्यन्ते

7. छात्राः स्वयोग्यतायाः रुचेः च अनुसारं योग्यान् शैक्षिकविकल्पान् चेतुम् असमर्थाः सन्तः स्वस्य वास्तविकीं क्षमताम् अवगन्तुम् असमर्थाः भवन्ति, यस्य च परिणामतः, अल्पप्रगतिं, निराशतां, मनोभारं वा अनुभवन्ति ते । अतः छात्राः स्वस्य वास्तविकीं क्षमताम् अभिरुचिक्षेत्रं च अभिज्ञातुं साहाय्यं यथा प्राप्नुयुः तथा विभिन्नेषु स्तरेषु शैक्षिकाभिरुचिपरीक्षाः व्यवस्थापयिष्यन्ते । छात्रेषु स्थितां न्यूनताम् अपाकर्तुं, विशेषाधिगमस्य आवश्यकतावतः बालान् अभिज्ञातुं, मन्दगत्या अधीयानानाम् अल्पोपलब्धिमतां च छात्राणां साहाय्यं विधातुं, व्यावसायिकैः कौशलाधारितैः च कार्यक्रमैः युक्तानां पाठ्यक्रमाणां चयनाय मार्गदर्शनं कर्तुम्, उद्योगावसराणां विषये माध्यमिकस्तरे उच्चमाध्यमिकस्तरे च मार्गं निर्देष्टुं च सहायतावाणी (हेल्प लैन्) व्यवस्थापयिष्यन्ते, तज्ज्ञाः, आप्तमार्गदर्शकाः विद्यालयेषु नियोक्ष्यन्ते च ।

४.५ पाठ्यक्रमस्य नवीकरणं परीक्षापद्धतेः परिष्कारः च

स्वामी विवेकानन्दः वदति – 'शिक्षणं नाम विषयविवरणानां सम्पूरणं न । बुद्धौ विषयविवरणानां सम्पूरणेन महान् उत्पातः सञ्जायते, समग्रं जीवनम् अव्यवस्थितं भवति च । अस्मत्समीपे जीवननिर्माणक्षमाः मानवनिर्माणसमर्थाः चरित्रनिर्माणदक्षाः च विचाराः भवेयुः । पञ्च विचारान् आत्मसात्कृतवन्तः भवन्तः यदि तान् जीवनस्य चरित्रस्य अङ्गानि कृतवन्तः स्युः तर्हि स्पष्टं यत् भवतां समीपे तावदधिकं शिक्षणं स्यात्, यावच्च समग्रं ग्रन्थालयमेव कण्ठस्थीकृतवतः समीपे अपि न स्यात् ।........ यदि शिक्षणं विवरणसङ्ग्रहणसमरूपं स्यात् तर्हि पुस्तकालयाः एव महान्तः ज्ञानिनः स्युः, विश्वकोषाः च असदृशाः ऋषयः भवेयुः ।........" जालपुटव्यवस्थायाः विस्तारकारणतः वैद्युतप्रपञ्चस्य सम्पर्ककारणतः च पुस्तकालयं प्रति गमनस्य आवश्यकतां विनैव सर्वविधानि विवरणानि उपलभ्यानि जातानि यत् तदेतदस्मिन् काले स्वामिनः विवेकानन्दस्य पूर्वोक्ता उक्तिः विशेषमहत्त्वम् आवहति । अतः अद्य विवरणसङ्ग्रहाधारितां शिक्षणव्यवस्थां जीवनकौशलाधारित-शिक्षाप्रणालीरूपेण, मूल्याधारितशिक्षाप्रणालीरूपेण च परिवर्तयितुं विशेषप्रयासः विधातव्यः अस्ति, येन सा मानवनिर्माणे राष्ट्रनिर्माणे च सहयोगं दातुं शक्नुयात् ।

उदयोन्मुखे अधिगमक्षेत्रे विशेषनैर्भर्यं निधाय शिक्षणस्य सर्वेषु अपि स्तरेषु पाठ्यक्रमस्य नवीकरणं विधातव्यम् अस्ति । वैश्वीयकरणस्य प्रभावस्य, उदयोन्मुखज्ञानाधारितायाः अर्थव्यवस्थायाः, समाजस्य अपेक्षाणां च अनुगुणतया शिक्षार्थिनः अनुक्रियाशीलान् विधातुं, विभिन्नानां शिक्षार्थिनां समूहस्य अधिगमावश्यकतां पूरयितुं, शिक्षायाः जीवनकौशलस्य कार्यजगतः च समन्वयं कर्तुं, सुस्थिराभिवृद्धिविषये आस्थाम् उत्पादयितुम्, अधिकनम्यतायाः दिशि वैयक्तिकीकरणस्य दिशि च गच्छन्त्याः अनुदेशीयव्यवस्थायाः विषये उत्तरदायित्वं प्रतिष्ठापयितुं च पाठ्यक्रमे अधिकम् अवधानं देयम् अस्ति । छात्राः अधिगमपरिणामानाम्

उत्कृष्टोपलब्धिम् अधिगन्तुं यथा शक्नुयु: तथा पाठ्यक्रमे शिक्षणकार्यप्रगतेः गुणस्तरस्य, अधिगमपरिणामानां च परिभाषणं विधातव्यम् अस्ति, येन शिक्षणस्य उद्देशानां पूर्ति: स्यात्, तथैव पाठ्यक्रमस्य संशोधनस्य उन्नयनस्य च दृष्ट्या यस्य च अभिलब्धे: मूल्याङ्कनं परिष्करणं च कर्तुम् अवसर: लभ्येत ।

छात्रस्य अधिगमस्य मूल्याङ्कने परिष्कार: अधिगमपरिणामानां परिष्करणप्रयासेषु अतिमहत्त्वपूर्णत्वेन परिगण्यते । रचनात्मिका योगात्मिका च मौल्यमापनप्रणाली सत्रान्ते वर्षान्ते च चाल्यमानासु परीक्षासु, एकादशद्वादशकक्ष्यो: परीक्षासु च अनुस्रियमाणा अस्ति अद्यत्वे । तथापि विद्यालयस्तरीया समग्रा मूल्याङ्कनप्रक्रिया तु सर्वथा असन्तोषजनिका एव । बहुषु अधिगममूल्याङ्कनेषु विषयवस्तुज्ञानस्य पुन:प्रस्तुतीकरणकौशलस्य एव परीक्षणं क्रियते । विद्यलयीयक्षेत्रस्य सहविद्यालयीयक्षेत्रस्य च अधिगमपरिणामान् अपि अविहाय छात्राणां व्यापकं मूल्याङ्कनं सुनिश्चितं कर्तुं समग्रमूल्याङ्कनप्रणाल्या: नवीकरणस्य अत्यावश्यकता अस्ति । समग्रे वर्षे विद्यालयीयानां सहविद्यालयीयानां च छात्राणां प्रगते: विवरणस्य सङ्ग्रहणाय कस्याश्चित् व्यवस्थाया: उपकल्पनस्यापि आवश्यकता अस्ति ।

एतदर्थम् अधोनिर्दिष्टा: नीतिक्रमा: अनुष्ठिता: भविष्यन्ति -

1. वर्धमानानां महत्त्वाकाङ्क्षाणां, सामाजिकस्य ऐक्यस्य, धार्मिकस्य, परस्परसहयोगस्य, राष्ट्रियोद्देशस्य च अनुरूपतां पूरयितुं पाठ्यक्रमे परिष्कार: करिष्यते । पाठ्यक्रम: परिणामाधारित: भवेत्, वर्धमानां तान्त्रिकशिक्षणापेक्षाम् आधृत्य स्थिते परिवेषे जीवनकौशलनस्य प्रदानं, छात्रस्य समग्रविकासस्य सम्पादनं च तस्य प्रमुख: उद्देश: स्यात् च । सर्वेभ्य: अपि छात्रेभ्य: मौलिककर्तव्यानाम् अधिकाराणां चेति उभयविधं शिक्षणं प्रदीयेत, येन देशे विदेशेषु च ते छात्राः उत्तरदायित्ववन्त: नागरिका: भवेयु: ।
2. विद्यालयशिक्षणक्षेत्रे जायमानं गुणवत्ताह्रासं निरोद्धुं राष्ट्रियानुसन्धानशैक्षिकपरिषद: (एन्.सि.ई.आर्.टि) पुनर्विन्यास: करिष्यते, शिक्षाशास्त्रस्य आवर्तकनवीकरणं विधास्यते च, येन रटनाधारितं शिक्षणम् अवगमनाधारितं भवेत्, जिज्ञासाया: भावनाया: च प्रोत्साहनं सिद्ध्येत् ।
3. विज्ञानस्य गणितस्य आङ्ग्लभाषायाश्च समान: कश्चन राष्ट्रियः पाठ्यक्रम: सज्जीकरिष्यते । सामाजिकविज्ञानादिषु विषयेषु समग्रे अपि देशे पाठ्यक्रमस्य कश्चन भाग: समान: भविष्यति, शिष्टा: भागा: राज्यानां विवेचनाधिकारम् अवलम्बन्ते ।
4. पञ्चमकक्ष्यात: अग्रे श्रेणीकृतक्रमेण पाठ्यक्रमे डिजिटल्-साक्षरताया: आरम्भ: भविष्यति । ऐ.सि.टि.सम्बद्धा: अंशा: विषयरूपेण षष्ठकक्ष्यात: पाठ्यक्रमे योजयितुं शक्या: । सर्वेषु अपि स्तरेषु ऐ.सि.टि.पाठ्यक्रम: परिष्करिष्यते, येन तस्य अनुप्रयोगाभिमुखता सिद्ध्येत् ।

5. एतत् तु सुविदितमेव यत् विज्ञानस्य परिकल्पनाः प्रदर्शनद्वारा प्रयोगालयीयप्रयोगद्वारा च सम्यक् अवगमयितुं शक्याः इति । अतः विज्ञानविषयाणां बिधनाय प्रायोगिकघटकाः षष्ठकक्ष्यायाः अनन्तरीयासु कक्ष्यासु क्रमशः परिचाय्यन्ते ।
6. विभिन्नतायां स्थितायाः एकतायाः विषये अधिकम् अवधानं दत्त्वा लिङ्गीय-सामाजिक-सांस्कृतिक-क्षेत्रीयविषमतायाः निवारणाय पाठ्यक्रमे, तस्य बोधने च अवधानं दीयते । एषः पाठ्यक्रमः सामाजिकन्यायसम्बद्धान् विषयान् संस्पृशति, सामाजिकं भेदभावम् अवरोद्धुम् उपायान् चिन्तयति च । पाठ्यक्रमस्य पाठ्यपुस्तकस्य च निर्मातॄन् दृष्ट्वा निश्चीयते यत् पाठ्यपुस्तकानि सद्भावं वर्धयन्ति, लिङ्गं, विकलाङ्गता, जातिः, मतम् इत्यादिभिः भेदभावजनकैः विषयैः सम्बद्धाः अंशाः, घटनाः, उदाहरणानि वा विषयवस्तुषु न सन्ति इति । सर्वेषां विषयाणां माध्यमेन नागरिकशिक्षा, शान्तिशिक्षा, चरित्रनिर्माणं, विधि-सांविधानिकसाक्षरता, वित्तीयसाक्षरता, पर्यावरणीयस्थिरता इत्यादीनि, अन्यानि एतादृशानि तत्त्वानि च संवर्धयिष्यन्ते ।
7. परीक्षाः व्यापकजागरूकतायाः अवगतये, व्यापकतायाः परिशीलनाय, उत्कृष्टतया समस्यानां समाधानस्य कौशलस्य वृद्धये च व्यवस्थाप्यते, न तु पाठ्यपुस्तकस्थानां सामग्रीणां पुनरुद्धरणमात्राय । सततं मूल्याङ्कनं, प्रश्नपत्रनिर्माणे मानकनिश्चयः, मूल्याङ्कनव्यवस्थायां पारदर्शिता इत्यादयः केचन उपायाः एतस्यां दिशि उपकारकाः भवितुम् अर्हन्ति । अनुकूलपरिवर्तनार्हतायाः आरम्भाय, वार्षिकपरीक्षायाः मनोभारस्य न्यूनीकरणाय च सर्वकाराणाम् अभियाचनाः आधृत्य परीक्षामण्डली(बोर्ड)परीक्षायाः आरम्भाय प्रयासः विधास्यते ।
8. दशमकक्ष्यायां गणितं, विज्ञानम्, आङ्ग्लभाषा इत्येतेषु त्रिषु पत्रेषु असफलतायाः आधिक्यं परिदृश्यते । एतस्याः असफलतायाः परिमाणं न्यूनीकर्तुं दशमकक्ष्यायां गणित-विज्ञान-आङ्ग्लभाषाः अधिकृत्य द्विस्तरीया परीक्षा व्यवस्थापयिष्यते । एका भवति उच्चस्तरीया, अपरा भवति मध्यमस्तरीया । येषम् अध्ययनविषयाणां निमित्तं गणितस्य, विज्ञानस्य, आङ्ग्लभाषायाः च पूर्वज्ञानम् अपरिहार्यं न, तादृशान् विषयान् व्यावसायिकविषयान् वा ये दशमकक्ष्यायाः अनन्तरं पठितुम् इच्छन्ति ते द्वितीयस्तरीयपरीक्षायां भागं वोढुं विकल्पः परिकल्पयिष्यते ।
9. अद्यत्वे केन्द्रीयाः राज्यीयाः च परीक्षामण्डल्यः दशमकक्ष्यायाः द्वादशकक्ष्यायाः च परीक्षाः सञ्चालयन्ति । छात्रैः तया मण्डल्या चाल्यमाना दशमकक्ष्यीया परीक्षा सम्मुखीकरणीया अवश्यमेव, यस्याः मण्डल्याः सम्बद्धता तदीयेन विद्यालयेन स्वीकृता स्यात् । दशमकक्ष्यीया मण्डलीपरीक्षा दशमकक्ष्यायाः समग्रं पाठ्यक्रमम् आधारीकृत्य भवति ।
10. अधिगमस्य विभिन्नस्य स्तरस्य प्रातिनिध्यं वहतां विभिन्नाभिः परीक्षामण्डलीभिः प्रदीयमानानां प्रमाणपत्राणां गुणवत्तायां मूल्ये च व्यापकविभिन्नता दृश्यते । एतावदेव न, काश्चन परीक्षामण्डल्यः

उत्तीर्णतायाः प्रातिशत्यस्य वर्धनाय कृपाङ्कदानमार्गम् अनुसरन्ति इत्यपि श्रूयते । एषा प्रथा अवश्यमेव स्थगनीया । तावदेव न, सर्वासां परिक्षामण्डलीनां, वर्षं यावत् अध्ययनेन छात्रैः आसादितायाः उपलब्धेः स्तरस्य च तुलनात्मकचित्रस्य उपस्थापनाय काचित् प्रणाली विकासनीया अस्ति अपि । तुलनात्मकपरिशीलनं कश्चन उपायः । अन्यः विकल्पः नाम दशमकक्ष्यायाः द्वादशकक्ष्यायाः च अन्ते केन्द्रीयपरीक्षायाः सञ्चालनम् अथवा सर्वाभिः परीक्षामण्डलीभिः प्रतिशततायाः आधारेण अङ्काः व्यक्तीकरणीयाः इति नियमकरणम् । एतादृशान् सर्वान् सम्भावितान् विकल्पान् अधिकृत्य शैक्षिकविशेषज्ञानां किञ्चन दलम् अध्ययनं कुर्यात्, यच्च छात्राणां साधनस्य स्तरं प्रकाशयितुं कञ्चन सुयोग्यं मार्गं परिचिनुयात् ।

11. प्रक्रियाविधौ परिष्कारविधानम् आरम्भणीयम् । यथा - स्थानान्तरणप्रमाणपत्रं, विद्यालयत्यागसम्बद्धं प्रमाणपत्रम् इत्यादयः स्थगनीयाः, येन छात्राः एकस्याः संस्थातः अपरां संस्थां प्रति गन्तुं कमपि क्लेशं न अनुभवेयुः ।

### 4.6 समावेशिशिक्षणं छात्रसाहाय्यं च

एतत् एकम् अतिरस्करणार्हं सत्यं यत् गुणवत्तां समानतां च अवलम्ब्य निर्मिता शैक्षिकप्रणाली वर्धमानायां ज्ञान-अर्थव्यवस्थायां निरन्तरसाफल्यस्य कुञ्चिकायते इति । किन्तु एतदपि सत्यमेव यत् वर्तमानशिक्षाप्रणाली विशेषतः ग्रामीणक्षेत्रेषु समावेशिशिक्षणाय वैविध्यमयं वातावरणं न सृजति इति । एतस्मात् विशेषावश्यकतावतां बालानां, सामाजिकतया अप्रगतसमुदायस्य बालानां च शैशिक्षकावश्यकताः पूरिताः न भवन्ति । यद्यपि एषु दशकेषु शिक्षणव्यवस्था ग्रामीणक्षेत्रीयान् यथा प्राप्नुयात् तथा करणे प्रगतिः दृश्यते, तथापि सामाजिकतया आर्थिकतया च दुर्बलानां वर्गे जातैः छात्रैः अधिगमावसरेषु असमानतासम्बद्धाः महत्त्वपूर्णाः बाधाः अनुभूयमानाः सन्ति एव, याश्च सामाजिककारणतः परिस्थितिजन्यकारणैः च सम्भवन्ति ।

वनवासिबालानां शिक्षणस्तरः गम्भीरचिन्तायाः विषयः अस्ति । अल्पा साक्षरता, अल्पतमं नामाङ्कनं, विद्यालयं परित्यजतां परिमाणे वृद्धिः, वनवासिबालानां मरणसङ्ख्यायाः आधिक्यम् इत्यादीनां समस्यानां परिहाराय प्रयासाः प्रचलन्ति । केन्द्रेण राज्यसर्वकारैः च क्रियमाणेषु छात्रवृत्तिप्रदानादिषु अनेकेषु प्रयत्नेषु सत्सु अपि वनवासिजनानां स्थितिः तु असन्तोषजनिका एव अस्ति । वनवासिबालानां शैक्षणिकविकासस्य अनभिवृद्धौ शिक्षकाणाम् अनुपलब्धिः अपि मुख्यं कारणम् अस्ति । वनवासिक्षेत्रे कार्यं कुर्वाणाः अवनवासीयाः अध्यापकाः तत्रत्यभाषानवगतिरूपां सञ्चारव्यवस्थाभावरूपां च समस्याम् अनुभवन्ति ।

छात्रवृत्तिद्वारा ऋणदानव्यवस्थाद्वारा वा अध्ययनकार्यक्रमेषु वित्तप्राप्तेः सुनिश्चिततायाः परिकल्पनाय मार्गस्य चिन्तनात् मेधाविनां छात्राणाम् अध्यनानुवर्तने महत् आनुकूल्यं सिद्ध्येत् ।

एतदर्थम् अधोनिर्दिष्टाः कार्यसूचिकार्यक्रमाः अनुष्ठास्यन्ते -

1. विविधताविषये अधिकनैभैर्यप्रदर्शनपूर्वकं महिलापुरुषभेदा:, सामाजिक-क्षेत्रीयविषमता: इत्यादीनां समस्यानां समाधानाय पाठ्यक्रमेषु प्रयास: करिष्यते । एतेषु पाठ्यक्रमेषु सामाजिकन्यायसम्बद्धा: अंशा: समाविष्टा: भवन्ति । सामाजिकभेदभावम् अवरोद्धुं मार्गाः अनुस्त्रियन्ते अपि ।
2. पूर्वव्यावसायिकाभिमुखा: कार्यक्रमा: पाठ्यक्रमस्य प्राथमिकस्तरात् आरभ्य एव समावेशयिष्यते, येन श्रमिकाणां विषये समादर:, कौशलविकास: इत्यादीनां विषये आदरयुता अभिवृत्ति: विकसिता भवेत् ।
3. प्रतिभाया: प्रोत्साहनाय, समानताया: अभिवृद्ध्यै च राष्ट्रिय: प्रोत्साहकनिधि: प्रतिष्ठापयिष्यते, यश्च मुख्यतया शैक्षणिकव्ययं, पाठ्यसामग्रीव्ययं, दशलक्षस्य बालानाम् आवासस्य व्ययं च निर्वोढुं विनियोक्ष्यते । आर्थिकदृष्ट्या ये दुर्बला: स्यु: तेभ्य: छात्रवृत्ति: अपि एतस्मात् निधित: प्रदास्यते । एतदतिरिच्य दशमकक्ष्याया: अनन्तरं राष्ट्रियस्तरे परीक्षामाध्यमेन सर्ववर्गीयाणां मेधाविनां छात्राणां निमित्तं राष्ट्रियमेधाछात्रवृत्तियोजनाया: आरम्भ: करिष्यते, यत्र सर्वे विषया: अन्तर्भविष्यन्ति ।
4. आश्रमशाला:, समीपस्था: माध्यमिकविद्यालया:, उच्चतरमाध्यमिकविद्यालया:, केन्द्रीयविद्यालया:, नवोदयविद्यालया: इत्यादीनां मध्ये सहगामिक्रिया सम्पर्कव्यवस्था च उपस्थापयिष्यते, समालोचन-परामर्शकतादिनिमित्तं योजना करिष्यते च ।
5. जनजातीयक्षेत्रस्थेभ्य: छात्रेभ्य: कौशलस्य प्रदानाय अधिकम् अवधानं देयम् अस्ति । राष्ट्रियकौशलविकाससंस्थाया: सहयोगेन नियतसमयस्य अनन्तरं विद्यालयेषु अधिककौशलाधारितपाठ्यक्रमस्य प्रवर्तनाय पदानि निक्षेप्स्यन्ते ।
6. अनुभवा: ज्ञापयन्ति यत् सर्वत्र अध्ययनमाध्यमत्वेन या क्षेत्रीयभाषा उपयुज्यते तस्या: अवगमने जनजातीया: बाला: कष्टम् अनुभवन्ति इति । एतां बाधां निवारयितुं प्रयासा: अनुष्ठास्यन्ते, यत्र आवश्यकता स्यात् तत्र बहुभाषीयशिक्षणव्यवस्थाया: आरम्भस्य सुनिश्चितता सम्पादयिष्यते च ।
7. सामाजिकी उपेक्षा, गृहे सहायकव्यवस्थाया: अनुपलब्धि:, विशेषत: लघुषु विद्यालयेषु ग्रामस्थेषु विद्यालयेषु च दृश्यमाना उपकरणानाम् अपर्याप्तता, आनुकूल्यानाम् अविद्यमानता इत्यादी: अनेकविधा: समस्या: सम्मुखीकुर्वतां दिव्याङ्गानाम्, अधिगमासामर्थ्यवतां छात्राणां च शैक्षिकीम् आवश्यकतां पूरयितुं विशिष्टा: कार्ययोजना: अनुष्ठास्यन्ते ।
8. विशेषावश्यकतावतां छात्राणां निमित्तं चाल्यमाना: केन्द्रप्रायोजितयोजना: अनुवर्तयितुं तासां व्याप्ति: अर्थसामर्थ्यं च वर्धयिष्यते । राज्यस्तरे जनपदस्तरे च तादृशी काचित् उपयोगिनी व्यवस्था उपकल्पयिष्यते, या च विभिन्नानां योजनानां कार्यान्वयने दत्तावधाना सती आवश्यकतावतां छात्राणाम् अभिज्ञाने साहाय्यदाने च कार्यं करिष्यति ।

9. स्थानीयस्तरे बालचिकित्सातज्ज्ञानां मनोवैज्ञानिकचिकित्साविशेषज्ञानां च कश्चन अंशकालिकी उपविशेषज्ञसमिति: सङ्घटयिष्यते, यस्या: सम्पर्कं य: कोऽपि विद्यालय:, जनपदशिक्षाधिकारी वा कर्तुम् अर्हति । तृतीयपक्षस्य परामर्शस्य मूल्याङ्कनस्य च आवश्यकतायां सत्याम् एषा उपसमिति: विशेषावश्यकतावतां बालानां सूक्ष्मतया सुयोग्यतया च निर्वहणाय अध्यापकेभ्यः विशेषप्रशिक्षणम्, अभिमुखीकरणपरामर्शं वा दातुम् अर्हति ।
10. केन्द्रसर्वकार: शिक्षणे असमर्थतासमस्याम् अपनेतुम्, अनुसन्धानाय, प्रशिक्षणाय च धननिवेशं व्यवस्थापयितुम्, आवश्यकानि संसाधनानि उपलब्धानि कारयितुं च कस्याश्चित् दीर्घकालिक्याः योजनायाः संरक्षणे आस्थां दर्शयिष्यति ।
11. सामाजिकतया आर्थिकतया च आनुकूल्येभ्य: वञ्चितानां बालानाम् अध्ययनकाले अतिरिक्ततया परिहारशिक्षणस्य परामर्शनस्य च निमित्तं व्यवस्था उपकल्पयिष्यते ।
12. प्रवासिबालानां शिक्षणस्य निमित्तं तेषां मूलस्थाने, यत्र पुनर्वास: आरब्ध: तत्र वा आवासीयविद्यालयस्य व्यवस्थापनेन, अन्येन सुयोग्येन मार्गोपायेन वा समानावसरप्रदानतत्त्वं भेदभावरहितव्यवहारं च अवलम्ब्य काचित् व्यवस्था उपकल्पयिष्यते ।
13. महिलापुरुषभेदभावरहिता हिंसाविषये शून्यसहिष्णुतायुता च दृष्टि: आत्मसात्करिष्यते । राज्यानां द्वारा विभिन्नप्रकारकाणां भावात्मकानाम् उपायानां द्वारा उच्चशिक्षायां महिलानां समावेशनस्य, पदेषु तासां स्थिरस्थिते:, स्थायि-उपस्थिते: च वृद्ध्यै प्रयासा: करिष्यन्ते । एतदर्थं विश्वविद्यालयप्रशासनस्य उच्चेषु पदेषु महिलानां नियुक्तिं विधातुं अधिक: प्रयास: विधास्यते ।
14. उन्नताध्ययनावसरे दुर्बलच्छात्राणां सबलीकरणार्थम् अनुसन्धानविकासविभागेन तेषाम् अनुसन्धानाय विकासाय च निधय: संरक्षिता: भविष्यन्ति । दुर्बलवर्गस्य उन्नत्यर्थम् आन्तरिकसंरचनायै, शैक्षिकगम्याय कार्यनिष्पादनाय च सामाजिकी आनुसन्धानिकी च लेखपरीक्षा करिष्यते ।
15. क्षेत्रीयस्य असन्तुलनस्य निवारणाय विभिन्नेषु दुर्गमक्षेत्रेषु; तन्नाम पर्वतीयक्षेत्रेषु, जनजातीयक्षेत्रेषु, मरुस्थले, तटवर्तिक्षेत्रेषु च, विभिन्ना नीति: अनुसरणीया भवेत् । 'ब्लाक्'स्तरे जिल्लास्तरे च शैक्षिकीम् अवगतिम् अवरोद्धुम् अपेक्षितानां मानदण्डानां पुनरवलोकनं करिष्यते, नूतनानां मानकानां निर्धारणं करिष्यते च । शैक्षिकं कौशलसम्बद्धं च अन्तरम् अभिज्ञाय शैक्षणिकदृष्ट्या, दुर्बलक्षेत्राणाम् अभिवृद्ध्यर्थं, सामाजिकदृष्ट्या, आर्थिकदृष्ट्या शैक्षणिकदृष्ट्या च ये वर्गा: दुर्बला: सन्ति तेषाम् अन्तर्भावनं सुकरं कर्तुं च जिल्लास्तरे कार्यनीति: आरचयिष्यते ।

### 4.7. साक्षरता जीवनशिक्षणं च

1978 तमवर्षस्य अक्टोबर्-मासस्य द्वितीये दिनाङ्के ऐदम्प्राथम्येन प्रौढसाक्षरताया: विषये यदा अनुरोधः श्रुत: तदा राष्ट्रियप्रौढशिक्षाकार्यक्रमस्य (एन्.एल्.ई.पि.) प्रवर्तनम् अभवत् । आरम्भस्य 40 वर्षेषु ग्रामीणकार्यात्मकसाक्षरता- योजना (आर्.एफ्.एल्.पी),

राष्ट्रियसाक्षरतायोजना (एन्.एल्.एम्.), साक्षरभारताभियानम् इत्येतादृशा: बहव: कार्यक्रमा: आरब्धा: । एतादृशेषु प्रयत्नेषु सत्सु अपि भारते 280 कोटिमिता: प्रौढा: असाक्षरा: एव सन्ति । एषा सङ्ख्या चिन्ताकरी सती प्रौढसाक्षरतासम्बद्धाया: समस्याया: विषये विशेषावधानस्य अभियाचनां करोति ।

कार्यात्मकसाक्षरता नाम यस्मिन् समुदाये या व्यक्ति: निवसति, सा तत्र कार्यकरणार्थम् अपेक्षितस्य पठनस्य, लेखनस्य, गणनाकरणस्य स्तरं प्राप्नुयात् इति । कार्यात्मिक्या: साक्षरताया: यशस्विता शैक्षिकविकासस्य एकीकृतम् अविभाज्यं च घटकम् अस्ति । वैश्विकयुववर्गस्य प्रौढसाक्षरताया: च मूलभूतं लक्ष्यम् अस्ति यत् समये समये परिकल्पनाकरणम् इति ।

अस्मिन् समकालीने विश्वे आजीवनं शिक्षणं साक्षरसमाजस्य कारकरूपेण परिगण्यते । एतै: मूलसाक्षरताकार्यक्रमै: सृष्टः शिक्षितवातावरणरूपी मार्ग: एव प्रगतिनाम्ना निर्दिश्यते, या च प्रगति: समाजे विद्यमानानां सर्ववर्गीयाणां शैक्षणिक-आवश्यकतानां पूरणे बहुमुखान् अवसरान् कल्पयति । जनानाम् अस्तित्वे गुणवत्तायां च वृद्ध्या सह राष्ट्रार्थं, मानवकुलार्थं, समाजार्थम्, आर्थिकविकासार्थं च अद्यत्वे आजीवनशिक्षणम् अनिवार्यम् अस्ति । यदि भारतेन वैश्विकी प्रतिस्पर्धा सम्मुखीकरणीया अस्ति, विकसितराष्ट्ररूपेण आत्मानम् परिचाययितुं सः इच्छति तर्हि आजीवनशिक्षणे सुष्ठु परिभाषिताभि: शिक्षणनीतिभि: कार्यक्रमै: च मानवसंसाधनानां गुणवत्तायाः परिष्कार: तेन करणीय: एव स्यात् । निरक्षराणां महती सङ्ख्या, ज्ञानाधारिताया: अर्थव्यवस्थाया: आवश्यकता, वैश्वीयकरणसम्बद्धानि स्पर्धाह्वानानि, सूचनाक्षेत्रे संवहनक्षेत्रे च जातः तन्त्रज्ञानस्य विस्तारः, जनानाम् आयु:प्रमाणे जातं वर्धनम् इत्यादीन् अंशान् परिशीलयेम चेत् भासते यत् प्रौढशिक्षणनीतौ प्रौढशिक्षाकार्यक्रमेषु च महत् परिवर्तनम् अपेक्षितं वर्तते इति । वैविध्यपूर्णे सङ्कीर्णे च भारतीयसमाजे साक्षरताविषये बह्वायामवत्याः दृष्टेः आवश्यकता अस्ति । साक्षरताया: विषये अस्माकं दृष्टिः न केवलं जीवननिर्वहणं, मनोरञ्जनं, विकासीयहस्तक्षेपः इत्यादीनां विषये एव स्यात्, अपि तु परिवर्तनशीला विकेन्द्रीकृता प्रसङ्गाधारिता अपि स्यात् ।

एतदर्थं अधोलिखिता: उपक्रमा: भविष्यन्ति -

1. वैश्विकयुववर्गस्य प्रौढसाक्षरतां साधयितुं विद्यमानानाम् उपक्रमाणां दृढीकरणं करिष्यते । पाठ्यचर्यार्थं स्वयंसेविसंस्थानां, सर्वकारेतरसङ्घटनानां, सर्वकारीयाणां शालानां, महाविद्यालयानां, शैक्षणिकसङ्घटनानां, युवसङ्घटनानां, महिलासङ्घटनानां च संयोजनं करिष्यते । एतेन बहु-आयमवतीनां नीतीनां क्रियान्वयनेन सह नवीकरणमपि भवितुम् अर्हति ।
2. वैश्विकीं साक्षरतां साधयितुं शीर्षस्तरे राष्ट्रियसाक्षरताप्राधिकरणं, राज्यस्तरे राज्यसाक्षरताप्राधिकरणं, जिल्ला-ब्लाक्-पञ्चायतस्तरेषु च लोकशिक्षासमित्य: च ये कार्यरता:

सन्ति, तैः सह स्थानीयसंसाधनसहायकसंस्थानाम् अपि नवीकृतप्रस्तुतिः, दृढीकरणं च अवश्यमेव करणीयम् ।

3. सर्वकारः ए.ई.कार्यक्रमाणां नवीकृतप्रस्तुतेः, दृढीकरणस्य च विषये अवधानं दातुं शीर्षस्तरे विशेषज्ञानां समितिं रचयिष्यति । एतेन साक्षरता, कौशलविकासः, प्रमाणपत्रार्थं पूर्वशिक्षणसमकक्षते, संस्थायाः औपचारिकशिक्षाप्रणाल्यां प्रवेशे आनुकूल्यं च प्राप्तुं शक्यम् । एषा समितिः प्रौढानां शिक्षणस्य अधिगमाय वैज्ञानिकमानदण्डस्य विकसनं करिष्यति । एन्.एल्.एम्.ए.संस्था प्रौढशिक्षाव्यक्तीनां पूर्वशिक्षणस्य, व्यावसायिकस्तरे उन्नयनस्य, प्रत्यायनप्रयोजनस्य च विषये प्रत्यायितप्रतिनिधित्वं कुर्वद्भिः सङ्घटनैः सहः सहभागित्वं निर्वक्ष्यति ।
4. प्रौढशिक्षाकार्यक्रमेषु कौशलविकासः, डिजिटल्व्यवस्था, वित्तव्यवस्था, विधिकसाक्षरता इत्येते अंशाः अन्तर्भाव्यन्ते ।

### 4.8. शिक्षायां कौशलं नियोजनीयता च

विकसितविश्वे उच्चनिर्भरतानुपातेन सह युवजनसंख्या ह्रियमाणा दृश्यते । किन्तु भारतं विश्वे तादृशं युवराष्ट्रम् अस्ति यत्र च समग्रजनसङ्ख्यायाः 54% जनाः ऊनपञ्चविंशवर्षीयाः । 2022 तमवर्षाभ्यन्तरे एतस्मिन् कार्यबले नूतनतया 104.62 कोटिमिताः युवानः समाविष्टाः भवेयुः इति अनुमीयते । एतेषां कौशलवर्धनं करणीयं भवेत् । तन्त्रज्ञानसम्बद्धानां, व्यावसायिकानां च शिक्षाकार्यक्रमाणां साहाय्यार्थं संस्थागतव्यवस्थाः अधुना अपि अपर्याप्ताः एव सन्ति ।

औपचारिकरूपेण व्यावसायिकक्षेत्रे कौशलविकासस्य योजनं कर्तुं, छात्राणाम् उर्ध्वाधारतां साधयितुं, समानान्तरगतिशीलतायाः अवसरे व्यावसायिकोपलब्धिषु शैक्षिकीं समानताम् आनेतुं च अद्यत्वे बहवः प्रयत्नाः प्रचलन्ति । तथापि नियोजनीयतायां प्रवर्धनं कर्तुं व्यक्तिगतविकासार्थम् आर्थिकवृद्ध्यर्थं च शिक्षणकौशलयोः संयोजनम् इतोऽप्यधिकतया करणीयम् अस्ति । उच्चगुणवत्तायुक्तस्य व्यावसायिकप्रशिक्षणस्य गरिम्णे, सामाजिकस्वीकृत्यै च शिक्षाकौशलयोः विषये अपि इतोऽप्यधिकम् अवधानं देयम् अस्ति ।

अधोलिखिताः नीतिगतोपक्रमाः भविष्यन्ति -

1. शालासु उच्चतरशिक्षणप्रणाल्यां च कौशलविकासकार्यक्रमाणां द्वारा न केवलम् अस्माकं छात्राणां कृते उत्तमोद्योगस्य अवसरदापनाय, अपि तु तेषु उद्यमकौशलस्य विकासकरणे साहाय्यार्थमपि तेषां पुनर्विन्यासः करिष्यते ।
2. २०१५ तम्यां राष्ट्रियकौशलविकास-उद्यमितानीतौ चिन्तितम् अस्ति यत् कौशलविकसकार्यक्रमाः २५% विद्यालयेषु उच्चतरशिक्षणसंस्थासु च समायोजयिष्यन्ते इति ।
3. विशेषावधानयोग्यानि जिल्लास्थानानि यानि सन्ति तत्रत्यानां शालाछात्राणाम् उद्योगावसरान् अभिवर्धयितुं, कौशलाभिवर्धनार्थं च विद्यालयान् आरब्धुं विस्तृता योजना सज्जीकरिष्यते ।

4. माध्यमिके, उच्चतरे, तान्त्रिके च शिक्षणे वर्तमानानां कौशलाधारितकार्यक्रमाणाम् एन्.एस्.क्यू.एफ्.माध्यमेन अधिकसामाजिकस्वीकार्यतां परिकल्प्य ऊर्ध्वतिर्यग्गतिशीलतां च दापयित्वा शिक्षणसम्बद्धया मुख्यधारया सह एकीकरिष्यते । एतत् प्रवेशनिर्गम-विकल्पाय, 'क्रेडिट्'ब्याङ्क्-प्रणाल्यै, 'क्रेडिट्'दानाय, संस्थागतसहयोगाय, राष्ट्रियमान्यतार्थं, निष्कर्षाधारितमूल्याङ्कनार्थं च कौशलसम्बद्धस्य राष्ट्रियव्यावसायिकमानकाधारितप्रतिपादनस्य माध्यमेन कौशलप्रमाणनार्थं संस्थागततन्त्रस्य सर्जनं करिष्यते ।
5. इदानीं यावत् पूर्वाधिगमस्य मान्यतायै (आर्.पि.एल्.) मूल्याङ्कनाय च किमपि तन्त्रं न विकासितम् । एतदन्तरं पूरयितुं सर्वकार: वर्षाभ्यन्तरे कौशलानां क्षमतानां च सत्यापनं मूल्याङ्कनं प्रवेशं च सुकरं कर्तुं, ये केचन औपचारिकशिक्षणं प्रशिक्षणं वा न प्राप्तवन्त:, किन्तु कौशलं प्राप्तवन्त: सन्ति, तेषां निमित्तं कस्यचित् तन्त्रस्य विकासनाय प्रयत्नं करिष्यति ।
6. छात्रा: भृतिम् उद्योगं वा प्राप्नुयु:, अथवा स्वकीयस्य उद्यमस्य आरम्भं वा कुर्यु: इत्येतदर्थं क्षेत्रकौशलपरिषत्, विद्यालय-महाविद्यालयप्राधिकरणम् इत्येतयोः द्वारा संयुक्तप्रमाणपत्रप्रदानम् उपकल्पयिष्यते ।

### 4.9. शिक्षाक्षेत्रे सूचना-संवहनप्रौद्योगिक्याः (आई.सी.टी) उपयोग:

गते 1986/93 तमे वर्षे संरचितायाः नीतिप्रणाल्याः अनन्तरं जात: सूचना-संवहनतन्त्रज्ञानप्रौद्योगिक्याः प्रादुर्भाव: महत्त्वपूर्णविकासरूपेण परिगण्यते, येन शिक्षणक्षेत्रे नूतना: आयामा: आनीता: । सूचनाप्रौद्योगिक्या: विभिन्नरूपि-उपयोगै: न केवलं क्षेत्रप्रबन्धार्थम्, अपि तु शिक्षाधिगमयो: गुणवत्ताया: वर्धने, शिक्षावसराणां विस्तारणे, शैक्षिकायोजनप्रबन्धयो: परिष्करणे च साहाय्यं कर्तुं नूतना: सम्भावनाः उत्पन्ना: जाता: सन्ति । सूचना-संवहनप्रौद्योगिकीव्यवस्थाया: (आई.सी.टी.) उपयोग: उपचारात्मकशिक्षायां, शिक्षकाणां प्रशिक्षणे, प्रौढसाक्षरताया: कार्यक्रमेषु, कौशलशिक्षाया: उच्चतरशिक्षायां च अधिगमोपकरणरूपेण, अभिशासनरूपेण, प्रबन्धोपकरणरूपेण च कर्तुं शक्य: । इदानीं विभिन्नेषु राज्येषु शालाप्रबन्धेन सह, छात्राणां शालानां च कार्यनिष्पादनस्य पर्यवेक्षणार्थम् सूचना-संवहनप्रौद्योगिक्याधारितानाम् अनुप्रयोगाणाम् उपयोग: क्रियमाण: अस्ति । अस्मिन् क्षेत्रे एतादृशानाम् एव अनेकेषां प्रयासानाम् उपक्रमाणां च प्रयोगा: प्रचलन्ति । अतः एतस्मिन् क्षेत्रे एकस्या: उत्तमाया: समन्वितकार्यनीते: आवश्यकता अस्ति, या च भारते शैक्षणिकक्षेत्रे सुपरिवर्तनाय सूचना-संवहनप्रौद्योगिक्याः उपयोगस्य व्यापकरूपेण प्रचारं प्रसारं च कर्तुम् अर्हति ।

अधोलिखितानां नीतीनाम् उपक्रमा: करिष्यन्ते –

1. शिक्षाया: सर्वेषु अपि स्तरेषु अधिगमक्षेत्रेषु च सूचना-संवहनप्रौद्योगिकी अविभाज्यत्वेन सम्मिलितं यथा स्यात् तथा कर्तुं प्रयासा: करिष्यन्ते ।

2. शिक्षाधिगमप्रक्रियायाम् अभिवृद्धिम् आनेतुं पठनपाठनप्रक्रियाया: उपकरणरूपेण सूचना-संवहनप्रौद्योगिकी उपयोगसम्बन्धिपाठ्यक्रमस्य अङ्गं भविष्यति ।
3. शिशो: शालाप्रवेशादारभ्य त्यागपर्यन्तं विद्यमानानां सर्वेषाम् अपि अभिलेखानाम् 'आन्-लैन्'संरक्षणम् अनिवार्यं करिष्यते ।
4. आय्.टी.-आधारितानाम् अनुप्रयोगाणाम् उपयोग: छात्राणां शिक्षकाणां च उपस्थितेः पर्यवेक्षणार्थं, शिक्षकाणां विद्यालयप्रशासकानां च कार्यनिष्पादनस्य मूल्याङ्कने, छात्राणां कार्यनिष्पादने, प्राशासनिककार्याणाम् अभिलेखाकरणे च करिष्यते ।
5. केन्द्रसर्वकारद्वारा राज्यसर्वकारद्वारा च विद्यालयानां प्रबन्धार्थम् आय्.टी.अनुप्रयोगाणां विशेषोपयोगाय प्राथमिकताया: आधारेण कश्चन कार्यक्रम: सज्जीकरिष्यते । आय्.टी.वृत्तप्रणाल्य: विद्यालयानां परिष्कृतप्रबन्धनार्थं कार्यनिष्पादनार्थं च शक्तानि साधनानि भविष्यन्ति ।
6. आय्.सी.टी.व्यवस्थां पृथक् कृत्वा द्रष्टुं न शक्नुम: । योग्यानां प्रकोष्ठानाम् उपलभ्यता, विद्युतः प्राप्तेः निरन्तरता (विश्वसनीयता), अन्तर्जाल(नेट्वर्क)सम्पर्कोपलब्धिः (कनेक्टिविटि), विद्यालयीयपरिसरस्य सुरक्षा, अवसंरचनाया: अनुसरणम् इत्यादय: स्युः चेदेव आय्.सी.टी.व्यवस्थायाः प्रयोजनं सिद्ध्येत्, न अन्यथा । अतः आय्.सी.टी.कार्यक्रमेषु एतेषां घटकानां सौलभ्यं कल्पयन्त: शैक्षिकावसराणाम् आनुकूल्यानां च विषये सुपरिष्कारदृष्ट्या अवधानं करिष्यते । किन्तु विश्वसनीयायाः विद्युद्व्यवस्थाया: समस्या तु भवितुम् अर्हेत् एव । शैक्षिकसंस्थासु आय्.सी.टि.-उपयोगस्य विस्तरणाय ऊर्जाया: उपयोगाय च कार्यक्रमा: अभिन्नाङ्गत्वेन भविष्यन्ति ।
7. आय्.सी.टी. इत्यस्य अन्य: अनुप्रयोग: अस्ति एम्.ओ.ओ.सी, यश्च माध्यमिक-उच्चतरशिक्षास्तराणां विशेषत: गुणवत्ताधारितशिक्षणस्य वृत्त्यर्थम् आय्.सी.टी.समर्थितशिक्षायां प्रवर्धने साहाय्यं करोति ।
8. पूर्वमेव यत् स्वरूपं विकसितम् अस्ति तस्य स्वीकरणं (संयोजनम्) अल्पावध्यर्थं कार्यनिर्वाहाय उपकारकं भवितुम् अर्हति । स्थानीयावश्यकतानाम् आपूर्त्यै पूर्वविकसितस्वरूपस्य उपयोगेन सह अनुप्रयोगाणां विकास: अपि करिष्यते । स्थानीयावश्यकतानुसारं शिक्षकाणां छात्राणां च द्वारा उपलभ्यमानान् तन्त्रांशान् (सोफ्टवेर्) उपयुज्य विभिन्नप्रकाराणां नूतनतन्त्रांशानां लघुतन्त्राशानां (आँप्) च सज्जीकरणार्थं प्रोत्साहनं सौविध्यपरिकल्पनं च चिन्तयिष्यते ।

## 4.10. शिक्षकस्य विकास: प्रबन्धनं च

गुणवत्ताया: अभिवृद्ध्यर्थं शिक्षकाणां क्षमता, प्रोत्साहनं च महत्त्वपूर्णं भवति । विद्यालयशिक्षणस्य विभिन्नस्तरेषु शिक्षकाणाम् असामर्थ्यं न्यूनीकर्तुम् अनेके उपक्रमा: उक्ता: सन्ति । एतस्मिन् क्षेत्रे कानिचन प्रमुखाणि स्पर्धाह्वानानि स्वीकरणीयानि भवन्ति एव । विद्यालये गणित-विज्ञान-भाषाविषयाणाम् अध्यापकानां न्यूनतायाः अपसारणम्, सेवारतानाम्

अध्यापकानां पूर्वसन्नाहप्रवृत्तेः वर्धनं, व्यावसायिकविकासार्थं कार्यक्रमाणां गुणवत्तावर्धनं, व्यावसायिकरूपेण शिक्षणस्य स्थितौ वृद्धिः, शिक्षकाणां प्रोत्साहः, अधिगमनिष्कर्षाणां सुनिश्चितताসम्पादनं च कर्तुं प्रयासाः करणीयाः । अनेकेषां विषयाणाम् उत्तरदायित्वे अभिवृद्धिः, शिक्षकस्य शिक्षणसंस्थानां शिक्षकप्रशिक्षकाणां च गुणवत्ताविषये चिन्तनम् अभिवृद्धिः च भवेत् ।

केन्द्रसर्वकारस्य राज्यसर्वकाराणां च द्वारा विभिन्नेषु प्रयासेषु प्रचलत्सु अपि, प्राथमिकस्तरे माध्यमिकस्तरे च शिक्षकस्थानानाम् अपूर्तिः, अप्रशिक्षितशिक्षकाणां समस्या, शिक्षकप्रशिक्षणसंस्थानां व्यावसायपरत्वसम्पादने अनादरः, प्रशिक्षण-वास्तविककक्ष्ययोः मध्ये स्थिता असङ्गतिः, शिक्षकाणाम् अनुपस्थितिः, शिक्षकाणाम् उत्तरदायित्वहीनता, शिक्षकाणाम् विषये अगौरवं, शिक्षणेतरकार्यकलापेषु शिक्षकाणाम् अवधानम् इत्यादीनां समस्यानां परिहाराय समुचितस्य मार्गस्य अन्वेषणे प्रयासः विधातव्यः अस्ति । अनेकेषु सर्वकारीयविद्यालयेषु पूर्णकालीनाः प्रधानाध्यापकाः प्रधानाचार्याः वा न सन्ति । प्रभाविनेतृत्वस्य न्यूनतायाः, अनुशासनहीनतायाः च कारणतः शिक्षणस्य गुणस्तरे ह्रासः जायमानः अस्ति विशेषतः । शिक्षायाः गुणवत्ताम् अभिवर्धयितुं व्यापकोद्देशान् मनसि निधाय अनेकाः नीतयः अनुसरिष्यन्ते ।

अधोलिखिताः नीतिक्रमाः अनुसरिष्यन्ते –

1. राज्यसर्वकारेण सह परामर्शं विधाय नियुक्तिसमये पारदर्शकतया, ज्ञानाधारिततया शिक्षकाणां च चयनं यथा स्यात् तथा दिशानिर्देशः करिष्यते । राज्यसर्वकारद्वारा शिक्षकाणां, प्रधानाचार्याणाम्, अन्यशिक्षकाणां च नियुक्तिनिमित्तं स्वतन्त्रशिक्षकनियुक्ति-आयोगस्य स्थापना करिष्यते ।
2. शिक्षासंस्थासु रिक्तस्थानेषु अध्यापकानां, प्रधानाचार्याणां च नियुक्तिः भविष्यति । प्रधानाध्यापकानां, प्रधानाचार्याणां कृते च नेतृत्वशिक्षणव्यवस्था अपरिहार्या करिष्यते ।
3. शिक्षकाणां निष्पक्षपातनियुक्तिः, समानवेतनं, स्थानान्तरणप्रापणप्रक्रिया इत्यादीनां सार्वजनिकप्रदर्शनाय पारदर्शकानि मानकनि विकासयिष्यन्ते । दूरस्थेषु कठिनक्षेत्रस्थेषु च विद्यालयेषु स्थानीयशिक्षकाणां नियुक्त्यर्थं प्रयासः करिष्यते ।
4. राज्यसर्वकारद्वारा शिक्षकाणां विषयानुगुणं, राज्यानुगुणं च आवश्यकतायाः मूल्याङ्कनं करिष्यते । अप्रशिक्षितानां शिक्षकाणां प्रशिक्षणं निर्धारितसमयावधितः पूर्वं समापयितुं जनशक्तेः आयोजनं भविष्यति । पदानुगुणं योग्यशिक्षकाणां नियुक्तिः भविष्यति । तदा संविदाव्यवस्थया नियुक्ताः शिक्षकाः तस्मात् पदात् क्रमशः निरस्तीकरिष्यन्ते ।
5. शिक्षकस्य अनुपस्थितेः अवधिः, स्थानरिक्तता, शिक्षकस्य उत्तरदायित्वस्य न्यूनता इत्यादयः विषयाः राजनीतेः सहमत्या, इच्छया च समाधस्यन्ते । उच्चप्राथमिकविद्यालयेषु माध्यमिकविद्यालयेषु च प्रधानाध्यापकानां प्रधानाचार्याणां च विषये विद्यालयप्रबन्धनसमितेः अनुशासनात्मकः अधिकारः भविष्यति, येन जङ्गमदूरभाषा (मौबाइल् फोन्), 'बायोमेट्रिक्'-

उपकरणम् इत्यादीनां द्वारा शिक्षकाणाम् उपस्थितिं समङ्क्य प्रौद्योगिकव्यवस्थासाहाय्येन तेषाम् अनुपस्थितेः, अनुशासनहीनतायाः च विषये अवधानं दास्यते ।

6. शिक्षकाणां पूर्वसन्नाहार्थं, सततव्यावसायिकताविकासार्थं च कार्यक्रमेषु प्रभावकारितायाः अभिवर्धनार्थं विशेषावधानं दास्यते । शिक्षकाणां गुणवत्तायाः वर्धनार्थम् अवधिः, पद्धतिः, संरचना, पाठ्यचर्या, शिक्षणे परिवर्तनं च आनेतुं डिप्लोमापदवीनां, स्नातकशिक्षकशिक्षाकार्यक्रमाणां, शिक्षकप्रशिक्षणसंस्थानां च समीक्षा करिष्यते ।
7. राष्ट्रियस्तरे शिक्षकशिक्षणाय सङ्कायविकासाय च विभिन्नानाम् उपक्रमाणां स्वीकरणार्थं कस्यचन शिक्षकशिक्षणविश्वविद्यालयस्य स्थापनं भविष्यति । एन्.सी.ई.आर्.टी.-द्वारा क्षेत्रीयशिक्षासंस्थानां विकासः करिष्यते । तथैव क्षेत्रीयस्तरे शिक्षकशिक्षाविश्वविद्यालयस्य सम्बद्धता करिष्यते ।
8. डाइट्, बि.एड् कालेज् इत्यादीनां सर्वासां शिक्षकशिक्षणसंस्थानां प्रत्यायनम् अनिवार्यं भविष्यति । ब्लाक् संसाधनकेन्द्राणां कृते 'बैंच्मार्किङ्ग'मानकं निश्चेष्यते ।
9. अध्यापकविकासकार्यक्रमे एतादृशः कश्चन अध्यापकानां गणः निश्चेष्यते येन ते अध्यापकाः जीवनकौशलं, नैतिकशिक्षणं, शारीरकशिक्षणं, कला, शिल्पशास्त्रम् इत्यादीनां सहविद्यालयपाठ्यक्रमाणां महत्तां जानीयुः, तान् शिक्षण-अधिगमप्रक्रियायां प्रभावितया आरब्धुं साहाय्यं प्राप्नुयुः च ।
10. राष्ट्रस्तरे अध्यापकप्रशस्तिदानेन सह राज्यस्तरे, जिल्लास्तरे चापि प्रशस्तिप्रदानकार्यक्रमाः आयोक्ष्यन्ते । एस्.एम्.सि.संस्था अध्यापकानां नामानि सूचयितुं महत्त्वपूर्णां भूमिकां निर्वक्ष्यति ।
11. गुणवत्तायुक्तं शिक्षणं दातुं, छात्राणाम् अधिगमपरिणामस्य वर्धनार्थं च अध्यापकानां क्षमतायाः, प्रेरणायाः, उत्तरदानसामर्थ्यस्य च वर्धने उपकारकाणां कार्यक्रमाणां प्राथमिकता उपकल्पयिष्यन्ते ।
12. सेवानिरतानाम् अध्यापकानां कृते वर्षत्रये एकवारं प्रशिक्षणं व्यावसायिकविकासकार्यक्रमे प्रतिभागिता च अनिवार्या भविष्यति । केन्द्र-राज्यसर्वकाराणां संयुक्ताश्रये कार्यवर्धनस्य लाभं प्राप्तुं वर्षत्रयात्मकस्य अवधेः समाप्तेः पूर्वं सर्वे सेवानिरताः अध्यापकाः प्रशिक्षिताः यथा भवेयुः तथा पर्याप्तव्यवस्था करिष्यन्ते ।
13. सर्वकारीयाणाम्, असर्वकारीयाणां च अध्यापकानां समये समये मूल्याङ्कनम् अनिवार्यतया भविष्यति । तेषां पदोन्नतौ, वेतनवृद्धौ च एतस्य मूल्याङ्कनस्य सम्बन्धः कल्पयिष्यते । तैः शिक्षकैः प्रतिपञ्चवर्षम् एकवारं मूल्याङ्कनपरीक्षा लेखनीया भविष्यति । तत्र उत्तीर्णता प्राप्तव्या भविष्यति, येन तेषां शिक्षणकौशलस्य, विषयज्ञानस्य च मूल्याङ्कनं भविष्यति ।

14. प्रत्येकस्मिन् राज्ये अध्यापकप्रशिक्षकाणां किञ्चन दलं (कैडर्) निर्मास्यते । एस्.सी.ई.आर्.टी, डाइट् इत्यादीनां सुदृढीकरणार्थं, क्षमतानिर्माणार्थं च एतादृशीसु संस्थासु अन्यासु अध्यापकशिक्षणसंस्थासु च अध्यापकानां नियुक्तिः करिष्यते ।

**4. 11 शिक्षणे भाषा, संस्कृतिः च**

कश्चन बहुभाषी समाजः शिक्षणे भाषाणां महत्त्वं जानाति एव । भारतसर्वकारेण राज्यसर्वकाराणां परामर्शनं कर्तुं त्रिभाषासूत्रं (टि.एल्.एफ्.) सज्जीकृतम् आसीत्, एतत् सूत्रं 1968 तमवर्षीये राष्ट्रियशिक्षानीतिसङ्कल्पे प्रतिपादितम् आसीत् च । एतत् सूत्रं 1986/92तमवर्षीयायां शिक्षानीतौ अनुष्ठानपथम् आगतम् । अद्यत्वे अधिकेषु राज्येषु त्रिभाषासूत्रस्य कार्यान्वयने विभिन्नता अनुसृता दृश्यते । भाषया सह उच्चस्तरस्य भावनात्मकस्य संहतिः योजिता इति कारणतः कोऽपि निर्धारः सर्वसम्मतः तु भवितुं नार्हति । समयानुसारं राज्ये स्थानीयमहत्त्वाकाङ्क्षतायाः, वरिष्ठतायाः च अनुगुणम् उत्तरदायित्वं निरूढम्, येन छात्राः अन्ताराज्यीयायाः, अन्तःक्षेत्रीयायाः, वैश्विकगतिशीलतायाः च निमित्तं भाषाकौशलस्य विकासं प्राप्नुयुः । छात्राः यदि मातृभाषया एव पाठिताः भवेयुः तर्हि ते उत्तमतया विषयं ग्रहीतुं, प्राप्तुम् च अर्हन्ति । अपरत्र आङ्ग्लभाषायाः अध्ययने, आङ्ग्लभाषामाध्यमविद्यालयानां च अपेक्षा समाजे वर्धमाना अस्ति ।

शिक्षणस्य उद्देशः अस्ति यत् शिक्षणेन सह भारतस्य समृद्धिः, पुरातनसंस्कृतिः, प्राचीनपरम्परा, विभिन्नसंस्कृतिः इत्यादीन् प्रति जागरूकता अभिवर्धनीया इति । एतादृशेन शिक्षणेन समाजे कश्चन उत्तरदायित्ववान् नागरिकः निर्मितः भवेत् । शान्तिः, सहिष्णुता, मतनिरपेक्षता, राष्ट्रियैकता, सामाजिकसमरसता, सर्वधर्मसहिष्णुता इत्यादिभिः सह जीवनमूल्यानां संवर्धने वैश्विकनागरिकताभावनायाः जागरणे च साहाय्यं भविष्यति ।

एतदर्थम् अधोलिखिताः नीतिक्रमाः परिगणयिष्यन्ते-

1. सर्वेषु अपि राज्येषु, सर्वासु शिक्षणसंस्थासु च यदि ते इच्छन्ति तर्हि पञ्चमकक्ष्यापर्यन्तं मातृभाषामाध्यमेन, स्थानीय-क्षेत्रीयभाषामाध्यमेन च शिक्षणं दातुं व्यवस्था करिष्यते ।
2. आङ्ग्लभाषायाः ज्ञानं राष्ट्रिय-अन्ताराष्ट्रीयगतिशीलतायाः महत्त्वपूर्णभूमिकायाः निर्वहणे, वैश्विकज्ञानं प्रति गमने च विशेषोपकारकं भवितुम् अर्हति । अतः बालाः आङ्ग्लभाषां पठेयुः लिखेयुः तत्र प्रावीण्यं प्राप्नुयुः च । एतदर्थं प्राथमिकस्तरीये शिक्षणे बोधनमाध्यमभाषा स्थानीया क्षेत्रीया वा भवेत्, द्वितीयभाषात्वेन आङ्ग्लभाषा स्वीकरणीया स्यात् । तृतीयभाषात्वेन अन्याः भाषाः स्वीकर्तुं शक्याः (प्राथमिके माध्यमिके च स्तरे) याश्च राज्यैः स्थानीयप्राधिकरणैः वा अङ्गीकृताः भवेयुः ।
3. उन्नतशिक्षणसंस्थाभ्यः, तान्त्रिकशिक्षणसंस्थाभ्यः, अन्याभ्यः व्यावसायिकसंस्थाभ्यः च भारतस्य परम्परायाः, भाषायाः, सांस्कृतिकविविधतायाः च विषये शिक्षणं दातुम् अवसरः कल्पयिष्यते ।

4. विद्यालयशिक्षणे भारतीयसंस्कृतेः, स्थानीय-पारम्परिकज्ञानस्य शिक्षणे च उचितं स्थानं कल्पयिष्यते । समानता, समता, सामाजिकन्यायः, बन्धुता, लोकतन्त्रम्, उत्तरदायित्वं, स्वाधीनता, स्वतन्त्रता, बन्धुत्वभावना, राष्ट्रिय-अखण्डता इत्यादीनां मौल्यानां समावेशनं कर्तुं नौतिकशिक्षणं सर्वेषु अपि स्तरेषु योजितं भविष्यति ।
5. भारतीयभाषाणां संवृद्धिः, विकासः च भवेत् इति कारणतः संस्कृतस्य विशेषमहत्त्वं, सांस्कृतिकैकतायां तस्य महत् योगदानं च मनसि निधाय विद्यालयस्तरेषु, विश्वविद्यालयस्तरेषु च संस्कृतशिक्षणार्थम् अधिकतया अवसराः कल्पयिष्यन्ते ।
6. नागरिकताभावः, अनुशासनं, समयनिष्ठा, स्वच्छता, सदाचरणं, ज्येष्ठानां दीनदलितादीनाम् असहायकानां च विषये समादरः, महिलानां सम्माननं, मानवीयतायाः भावना इत्यादीन् अंशान् छात्रान् पाठयिष्यन्ति शैक्षणिकसंस्थाः ।

**४. १२ व्यापकशिक्षणमाध्यमेन आत्मविकासः**

शिक्षणे बालस्य सर्वतोमुखविकासः (संज्ञानात्मक-शारीरक-सामाजिक-भावनात्मकाः) अन्तर्भवेत् । तदर्थं शैक्षणिक-उपलब्धिभिः सह अन्येषां विषयाणाम् आकलनस्य अपि आवश्यकता अस्ति । अधिगमपरिणामेषु अन्येषु सहशैक्षिकक्षेत्रेषु च प्रगतिं सम्पाद्य बालानां समग्रविकासार्थं सम्पूर्णव्यवस्थायाः विषये एव प्रकाशः दीयमानः अस्ति । एतदेकं सर्वविदितं सत्यमस्ति यत् कश्चन आरोग्यवान् बालः एव समीचीनतया अध्येतुम् अर्हति इति । उत्तमम् आरोग्यम् उत्तमतया शिक्षणप्राप्तौ साहाय्यम् आचरति । वस्तुतः अधिकसंख्याकाः बालाः कुपोषणेन ’एनिमिया’रोगेण च ग्रस्ताः सन्ति इत्येषः अंशः महत्याः चिन्तायाः एव विषयः । तस्मात् ते छात्राः उत्तमतया शिक्षणप्राप्तौ कष्टम् अनुभवन्ति ।

अधोलिखिताः नीतिगतक्रमाः कार्यान्विताः भवेयुः –

1. बालानां समग्रविकासार्थं शारीरकशिक्षणं, योगः, क्रीडा, एन् सी सी, एन् एस् एस् ए, कलाशिक्षणं, बालसंसत्, शिल्पकला, साहित्यम् इत्यादीनां कौशलानाम्, अन्येषां सहशैक्षिककार्यक्रमाणां च आयोजनेन सह ते सर्वेषु विद्यालयेषु पठ्यक्रमत्वेन दैनिककार्याणाम् अभिन्न-अङ्गत्वेन वा यथा भवेयुः तथा करिष्यते । विद्यालयेभ्यः मान्यतादानावसरे उपर्युक्तविषयाणाम् अन्तर्भावः अनिवार्यः भवेत् ।
2. विद्यालयेषु सर्वेषां सहशैक्षिककार्यक्रमाणां निमित्तं सर्वकारद्वारा विद्यालयव्यवस्थाद्वारा वा अर्थनिधेः व्यवस्था भवेत् ।
3. प्रायः स्वास्थ्यविभागद्वारा विद्यालयानां स्वास्थ्यसम्बद्धाः घटकाः कार्यं कुर्वन्ति । स्वास्थ्यविभागस्य एतादृशकार्यस्य क्रियान्वयनविषये विद्यालयैः संस्थाभिः च सहयोगः दातव्यः । स्वास्थ्यपरीक्षणार्थं विद्यालये कश्चन गणः सज्जीकरणीयः, तस्य द्वारा स्वास्थ्यविभागेन निश्चितानां कार्यक्रमाणां क्रियान्वयनं समीचीनतया करणीयम् । ’डिजिटल् इण्डिया’- कार्यक्रमस्य

भागत्वेन सर्वेषु अपि विद्यालयेषु सर्वस्यापि बालस्य स्वास्थ्यसम्बद्धः अभिलेखः, स्वास्थ्यविषये ज्ञानं, स्वास्थ्यपरीक्षणम् इत्यादीनां निमित्तम् "एप्स्' सज्जीकरणीयम् ।

4. निरन्तरमध्याह्नभोजनयोजनायाः (एम्.डी.एम्.एस्.) त्वरितगत्या कार्यान्वयनं विद्यालयपोषणे, कार्यक्रमपोषणे, सामाजिकसमानतायाः प्रोत्साहनार्थं च साहाय्यम् आचरति । मध्याह्नभोजनयोजनायाः विस्तारः माध्यमिकविद्यालयपर्यन्तमपि भवेत् । मध्याह्नभोजनस्य सिद्धतायाः, परिवेषणस्य च उत्तरदायित्वं पर्यवेक्षणं वा शिक्षकाणां न भवेत् । केन्द्रीकृतपाकशालासु पाकं सज्जीकृत्य विद्यालयेषु वितरणार्थं सेवाप्रधानानां प्रख्यातानां सामुदायिकसंघटनानां नियुक्त्यर्थं प्रोत्साहः करिष्यते ।

**४.१३ विद्यालयानां मूल्याङ्कनं शासनं च -**

विद्यालयेषु समुदायस्य, पालकानां च सहभागः सर्व-प्रवेश-प्रक्रिया-परिणामक्षेत्रेषु विद्यालयस्य प्रगतौ च महत्त्वपूर्णभूमिकां निर्वहति । यदा स्थानीयः गणः विद्यालयस्य कार्यक्रमेषु भागं वहेत् तदा सः ग्रामीणविद्यालयः अपि अतीवप्रभावशालितया कार्यं कर्तुं शक्नुयात् । विद्यालयेषु उत्तमशासनव्यवस्थायाः संरचनम्, आदेशदातॄणां कार्यकर्तॄणां च मध्ये उत्तमसम्बन्धः, उत्तमव्यवस्थासम्बद्धकार्याणां सम्पादनार्थं जनपदस्तरे वलयस्तरे वा शिक्षण-अधिकारिणां, मुख्याध्यापकानां च प्रशिक्षणं, विद्यालयस्य कार्यसम्पादनविषये समीचिनं पर्यवेक्षणं, सहायतार्थं विद्यमानानां दत्तांशानाम् उपयोगः, सामुदायिकसंसाधनानां सङ्घटनं, विद्यालयस्य कार्यक्षमतायाः वर्धनम् इत्यादीनां प्रयासानाम् आवश्यकता अनुभूयते एव । एवंप्रकारेण शैक्षिक-सहशैक्षिकक्षेत्रेषु वास्तविक-अवसंरचना, शिक्षकप्रबन्धनं, विद्यालयप्रतिनिधित्वम्, अधिगमपरिणामविषये सन्तृप्तिः, छात्राणां तेषां पालकानां च सन्तुष्टिः इत्यादीनाम्, विद्यालयस्य कार्यपद्धतेः सर्वेषु अपि मुखेषु अवधानं दत्त्वा विद्यालयस्य गुणवत्तायाः आकलनस्य, प्रत्यायनप्रणाल्यां सुव्यवस्थायाः सम्पादनस्य च आवश्यकता अपि विशेषतः प्रतीयते । विद्यालयव्यवस्थां परिवर्तमानपरिस्थितीनाम् अनुकूलां विधातुं, यत्र आवश्यकता भवेत् तत्र उपचारात्मकार्याणाम् आरम्भाय च उत्तरदायित्वसहिता विद्यालयीयया उपयुक्तस्वायत्तकार्यमण्डल्या युक्ता शासनपद्धतिः अपि अनिवार्या ।

अधोलिखिताः नीतिगतक्रमाः कार्यान्विताः भवेयुः -

1. समग्रे अपि देशे विद्यालयानां गुणवत्ता, शिक्षकाणां तान्त्रिकक्षमता, विद्यालयनेतृत्वं, विद्यालयव्यवस्था इत्यादीनां मापनार्थं, स्वमूल्याङ्कनार्थं, कार्यनिष्पादनस्य मूल्याङ्कनार्थं च विभिन्नानां परिमाणानां सङ्केतानां मानदण्डप्रमापकाणां च प्रयोगः करिष्यते । तदनन्तरं तस्य मानदण्डप्रमापकस्य आधारेण विद्यालयानां मूल्याङ्कनं, स्तरदानं, श्रेणीदानं च प्रवर्तेत ।
2. विद्यालयमण्डल्याः मान्यतानिमित्तं किञ्चन तन्त्रं संस्थापयिष्यते ।

3. केन्द्र-राज्यसर्वकारयोः आर्.टी.ई.-अधिनियमानां मानदण्डानुगुणं, नीतिनियमानाम् अनुगुणं च विद्यालयसमितिः (एस् एम् सी) कार्यं कुर्यात् । तेषां नियमानां व्यापककार्यान्वयनार्थं, तस्य पर्यवेक्षणार्थं च दिशानिर्देशनं भवेत् ।
4. विद्यालयसमितेः पर्यवेक्षणस्य भागत्वेन राज्यसर्वकारः तासां समितीनां निर्वाचनप्रक्रिया, आवृत्तिः, कार्यकला, भूमिका, उत्तरदायित्वं, कार्यपद्धतिः इत्यादिषु विषयेषु स्पष्टतया मार्गदर्शनं करिष्यति । राज्यीयस्य एस्.एम्.सी.प्रशिक्षणस्य निमित्तम् अर्थशक्तेः वर्धनस्य प्रयासाः अपि करिष्यन्ते । विद्यालयस्य विकासयोजनानां प्रभावितया कार्यान्वनाय विद्यालयेभ्यः दीयमानम् अनुदानं निर्दिष्टे समये यथा प्राप्येत तथा निश्चयः करिष्यते । जनपदस्तरस्य आयव्ययव्यवस्थया सह योजनाप्रक्रियाभिः सह वा विद्यालयसमितेः योजनम् अपि करिष्यते ।
5. साक्ष्याणि दर्शयन्ति यत् कतिपये विद्यालयाः प्राचार्यस्य प्रधानाध्यापकस्य वा कारणादेव अन्येषां विद्यालयानाम् अपेक्षया उत्तमगुणवत्तां प्रदर्शयन्ति इति । अध्यापने न्यूनातिन्यूनं पञ्चवर्षात्मकः अनुभवः येषां स्यात्, तेषु अध्यापकेषु एव अन्यतमः योग्यतायाः सामर्थ्यस्य च आधारेण प्रधानाध्यापकत्वेन चेष्यते । तादृशानां चितानाम् अध्यापकानां कश्चन पृथक् गणः निर्मास्यते । तथैव रिक्तानां प्रधानाध्यापकपदानां पूरणम् अतिशीघ्रतया करिष्यते च ।
6. संवर्धितविद्यालयानाम् अभिशासनस्य विस्तारणं विद्यालयप्रतिनिधित्वपरिभाषायाः अग्रे, ततोऽप्यधिकतया समग्रनेमिपर्यन्तम् अपि यथा स्यात् तथा करणस्य आवश्यकता अस्ति, यस्मिन् शासने विद्यालयनेतुः भूमिकायाः उत्तरदायित्वानां च स्पष्टा परिभाषा, विद्यालयनेतुः सामर्थ्यस्य स्पष्टता, मुख्याध्यापकस्य प्राचार्यस्य वा चयनार्थं सुदृढप्रक्रियाणाम् आरम्भः, विद्यालयनेतॄणां सम्पूर्णकार्याणि, व्यक्तित्वविकासार्थं सुपरिभाषितमार्गदर्शानं, निरन्तरतान्त्रिकविकासस्य अवसरप्रदानम् इत्यादयः अन्तर्हिताः भवेयुः ।
7. विद्यालयानां शैक्षिकप्रदर्शनस्य विकासस्य प्रगतेः च उत्तरदायित्वं मुख्याध्यापकस्य प्राचार्यस्य वा भवेत् ।

### ४.१४ उच्चशिक्षणे शासनसम्बद्धप्रगतिः -

विगतेषु वर्षेषु भारते उच्चशिक्षणक्षेत्रे स्थानीयविविधताभिः सह अभूतपूर्वः विस्तारः जातः अस्ति । तस्य क्षेत्रस्य अनियोजितविस्तारः गुणवत्तायाः वृद्धौ, अन्येषु विषयेषु च समस्याः उत्पादयन् अस्ति । उच्चशिक्षणे शासनं नियामनं च इत्येतत् उभयमपि परस्परं सम्बद्धम् एव । तस्मात् स्थानीयस्तरेषु शासनस्य नियामकसम्बद्धानां विषयाणां च सर्वदृष्ट्या अपि सांविधानिकस्थितिनियमानुगुणं सज्जीकरणस्य आवश्यकता अस्ति ।

उच्चशिक्षणस्य शासनं प्रभावयुतं कर्तुम् अधोलिखिताः नीतिगतक्रमाः कार्यान्विताः भवेयुः -

1. वैश्विकस्तरे शिक्षणज्ञानस्य, पाठ्यक्रमस्य, मूल्याङ्कनस्य च प्रगत्या सह नूतनानां क्षेत्राणां, विषयाणाम्, अधिकाराणां च परिचयार्थं मानवसंसाधनविकसमन्त्रालयस्य साहाय्यम् आचरितुं पञ्चसु वर्षेषु एकवारं शिक्षणतज्ज्ञैः युतः कश्चन शिक्षण-आयोगः संरचयिष्यते, यश्च वैश्विकदृष्ट्या कार्यकरणे राष्ट्रियमहत्त्वाकांक्षायां जायमानानां परिवर्तनानाम् अनुगुणं कार्यकरणे च साहाय्यम् आचरेत् ।
2. उच्चशिक्षणसंस्थानां सर्वकारीयविभागाः सर्वहितधारकाः करिष्यन्ते यस्मिन् उद्योगिनः भूतपूर्वच्छात्राणां प्रतिनिधयः चापि अन्तर्भवेयुः । तेषां विभागानां संरचनार्थं चयनार्थं च स्पष्टं पारदर्शकं च मार्गदर्शनं भवेत् ।
3. स्नातकपूर्वः स्नातकोत्तरश्चेति द्वयोः अपि स्तरयोः समवर्तिशिक्षणेन सह स्नातक-स्नातकोत्तर-संशोधन-(डाक्टरेट्) अध्ययनविभागान् संयोज्य विश्वविद्यालयस्तरस्य व्यवस्थां कल्पयितुं प्रयत्नः करिष्यते, येन शिक्षण-संशोधनयोः मध्ये सहकारस्य प्रगतेः च साहाय्यं भवेत् । विश्वविद्यालयः वस्तुतः बहुविषयात्मकः भवेत्, न तु एकविषयात्मकः ।
4. राज्यभारतीय-शिक्षण-सेवायाः (ऐ.ई.ई.एस्) घटनाय १९६८ तमवर्षीयाणां, १९८६-९२ तमवर्षीयाणां च पूर्वनीतीनां क्रियान्वनाय च प्रयत्नः करिष्यते इत्येतत् अत्र पुनरुच्चार्यते । संवर्गनियन्त्रणप्राधिकरणस्वरूपेण मानवसंसाधनविकासमन्त्रालयेन सह ऐ.ई.ई.एस् अपि काचित् अन्ताराष्ट्रीयसेवा भविष्यति । ऐ.ई. ई. एस्. इत्यस्य संरचनापर्यन्तं विभिन्नेषु राज्येषु शिक्षणक्षेत्रे विद्यमानविद्यासंस्थाः प्राशासनिकपदानां सङ्घाः च लोकसेवा-आयोगद्वारा (यु वि एस् सी) एकवारं विशेषाधिकाररूपेण कार्ये पदं स्थापयेयुः ।
5. सर्वकारीयाणां विद्यालयानां, सर्वकारीयेतरविद्यालयानां च विरुद्धं विद्यमानानां विवादानां परिहारार्थम्, आरोपाणां निवारणार्थं च केन्द्रे राज्येषु चापि पृथक् शिक्षण-अधिकरणस्य संस्थापनं करिष्यते । तेषां विभागानाम् आध्यक्ष्यम् उच्चन्यायालयस्य सेवानिवृत्तन्यायाधीशः वहेत् । तानि अधिकरणानि कार्यनिर्वहणं शीघ्रतया यथा कुर्युः तथा संक्षिप्तप्रक्रियाणाम् अनुसरणाय अधिकारः प्रदास्यते ।
6. सर्वकारः लोकतन्त्रस्य वर्धनार्थं लोकतन्त्रव्यवस्थाः, शासनं, प्रक्रियाः इत्यादिभिः सहैव चर्चा-वादविवाद-विचाराणां सबलीकरणाय छात्रसङ्घानां द्वारा निरूढायाः भावात्मिकायाः भूमिकायाः मान्यतां करोति, तासां प्रोत्साहनं करोति च । तथापि इदं दृश्यते यत् ये आ अनेकेभ्यः वर्षेभ्यः यस्य पाठ्यक्रमस्य अध्ययनार्थं तत्र प्रवेशं प्राप्तवन्तः ते तदध्ययनं विहाय, अपि च बहिष्टात् ये आगताः छात्राः ते च तत्परिसरे एव हानिकारकगतिविधीनाम् असामञ्जस्यकार्याणां च प्रवर्तने निरताः दृश्यन्ते । ये छात्रराजकीये सक्रियभूमिकां निरूढवन्तः तान् सर्वान् बाह्यजनान्, शासननियमानाम् उल्लङ्घनं कृतम् इत्यतः संस्थायाः छात्रत्वेन न परिगण्यन्ते तान् च

नियन्त्रयितुं, तादृशच्छात्राणां परिवर्तनार्थं, छात्रावासे एव स्थिरतया तेषां वासं निवारयितुं, संस्थायाः विधिनियमानां दुरुपयोगात् दूरीकर्तुं च किञ्चन अध्ययनं प्रवर्तेत ।

7. सर्वासु अपि उच्चशिक्षणसंस्थासु काचित् प्रभावशालिनी आरोपनिवारणव्यवस्था कल्पयिष्यते । यदि कोऽपि छात्रः विभागस्य सङ्घटनस्य वा विरुद्धं किमपि आचरेत् तर्हि तस्य दण्डनात्पूर्वं नैसर्गिकन्यायसिद्धान्तस्य, यत्र अपराधिमनोभावस्य अवगमनाय अन्यपक्षस्य कथनस्य श्रवणाय च प्रयासः भविष्यति, अनुसरणं करिष्यते ।
8. इदानीं तु या सम्बद्धता व्यवस्था अस्ति सा एव अग्रे अपि अनुवृत्ता भविष्यति । सम्बद्धतावतां महाविद्यालयानां, संस्थानां वा अधिकतमा संख्या १०० भवेत् । शताधिकानां महाविद्यालयानां सम्बद्धता येषां विश्वविद्यालयानां स्यात् तेषां पुनर्घटनं भवेत् ।
9. सार्वजनिकधनेन पोषितासु उच्चशिक्षणसंस्थासु उत्कृष्टतायाः वर्धनार्थं गतिविधीनां प्रोत्साहेन सह मापनाधारितवित्तपोषणस्य आरम्भः करिष्यते । सर्वाः सार्वजनिकवित्तपोषिताः संस्थाः विशिष्टलक्ष्यान्विताः, समयानुगुणयोजनाबद्धाः च भवेयुः, येन वित्तीय-प्राशासनिकोत्तरदायित्वैः सह स्वायत्ततायाः निश्चयः भवेत् ।

### 4.15 उन्नतशिक्षणे नियन्त्रणम्

स्वसंस्थापनकाले ये स्वयंचिन्तिताः परिनियमाः आसन् तान् अनुसरन्त्यः प्रमुखा: राष्ट्रियसंस्था: विभिन्नेषु समयेषु आरब्धाः अभवन् । कालस्य परिवर्तनात् उच्चशिक्षाप्रणाल्यां वर्तमानस्य भविष्यतः च आवश्यकतानाम् अधिकप्रासङ्गिकतापरिकल्पनस्य आवश्यकता आपतिता । उन्नतशिक्षणवलये नूतनप्रगतयः अपि जाताः । अतः इदानीं नियामकरचनायाः समीक्षायाः आवश्यकता आपतिता । तेनैव सह नियन्त्रणपरिधे: परिशीलनपूर्वकम् उन्नतशिक्षणे नियन्त्रात्मकव्यवस्थासम्बद्धानि कानिचन स्पर्धाह्वानानि जागरूकतया निर्वेढव्यानि सन्ति । स्वायत्ततोत्तरदायित्वयो: मध्ये आरोग्यपूर्णसमतोलनस्य अपि आवश्यकता वर्तते । राज्यसर्वकारा: विश्वविद्यालयाश्च स्वपरिधौ विद्यमानानाम् उन्नतशिक्षणसंस्थानां नियन्त्रणे किञ्चन निर्णायकपात्रं वोढुम् अर्हन्ति ।

एतदर्थम् अध: उल्लिखिता: नीतिक्रमा: स्वीकरिष्यन्ते -

1. राष्ट्रियम् उन्नतं शिक्षणम् अध्येतृवृत्तिकार्यक्रमस्य (फेलोशिप्) प्रबन्धनाय किञ्चन स्वतन्त्रं तन्त्रं स्थापयिष्यति ।
2. काचित् केन्द्रीयशैक्षणिक-सांख्यिकीसंस्था (सि.ई.एस्.ए.) प्रतिष्ठापयिष्यते, या च केन्द्रीयविवरणसङ्ग्रहाय, वृत्तसङ्कलनाय, संस्थाबलवर्धनाय, उत्कृष्टगुणवत्ताया: सांख्यिकीपरिणते: निर्वहणसूचनाव्यवस्थायै च पूरिका स्यात्, यस्याः च उपयोगः भाविविश्लेषणमानवशक्तियोजनायां, भविष्यत्कालीनस्य पाठ्यक्रमस्य परिष्करणाय च स्यात् ।

एषा केन्द्रीयशैक्षणिक-सांख्यिकीसंस्था मूलसौकर्याणाम् उपलब्धिः, नूतननिर्माणम्, उन्नतीकरणम् इत्यादीन् अंशान् अवलम्ब्य एच्.ई.ऐ, इत्यस्य भौगोलिकट्याागिङ्ग्-साधनानि विकासयिष्यति ।

3. उन्नतशिक्षणराज्यपरिषदः अङ्गीकृत-अनुमतसंस्थानां सहयोगेन विश्वविद्यालयानां, महाविद्यालयानां च शैक्षिकमानकानां परिशीलनं काले काले कुर्युः इति अतिदिष्टाः भविष्यन्ति ।
4. सर्वासाम् अपि उन्नतशिक्षणसंस्थानां किञ्चन पारदर्शकतायुक्तम् उत्कृष्टं जालस्थानं (वेबसैट्) स्यात्, यत्र च शिक्षणसंस्थायाः प्रवेशविषये सूचना, शुल्कं, बोधकाः, कार्यक्रमाः, परिक्षाफलितांशः, नियुक्तिः, शासनम्, आर्थिकस्वरूपम्, वाणिज्यसम्मिश्रणम्, निर्वहणविषये, शैक्षणिकविषये, विद्वत्पूर्णकार्यक्रमादीनां विषये च वृत्तानि, संस्थासम्बद्धाः इतरविषयाः च अन्तर्गताः स्युः ।

### 4.16 उन्नतशिक्षणे गुणवत्तायाः आश्वासनम्

विश्वविद्यालयानां महाविद्यालयानां च द्वारा अनेकाः समस्याः सम्मुखीक्रियमाणाः सन्ति, यासु अपर्याप्तानि मूलसौकर्याणि, सौविद्ध्यानि, महता प्रमाणेन बोधकपदानां रिक्तता, बोधकानां निकृष्टगुणवत्ता, प्राचीनाः पाठनपद्धतयः, शीर्यमाणा शोधगुणवत्ता इत्यादयः सन्ति । एतेन सह व्यापके भौगोलिके लिङ्गे वलये च सामाजिकासमतोलनस्य समस्याः अपि सन्ति । एताः समस्याः उच्चशिक्षणस्य निकृष्टगुणवत्तायाः प्रतिबिम्बरूपाः सन्ति । गुणवत्ताश्वासनस्य भागरूपेण सम्प्रति संस्थाभिः एन्.ए.ए.सि.द्वारा एन्.बि.ए.द्वारा च मान्यता अपि प्राप्तव्या अस्ति अनिवार्यतया ।

अयं चिन्तनीयः विषयः अस्ति यत् काश्चन एव संस्थाः विश्वविद्यालयाश्च जागतिकश्रेयोऽङ्के (GLOBAL RANKING) स्थानं प्राप्तुं प्रभवन्ति इति । विश्वविद्यालयानां जागतिकश्रेयोऽङ्कः शोधपत्रे शिक्षणक्षेत्रे च उत्कृष्टं मूल्याङ्कनं, बोधकसदस्यानां गौरवं, नियोर्क्तॄणां च प्रतिष्ठा, मूलसौकर्याणाम् उपलब्धिः, अन्ताराष्ट्रीयच्छात्राणां कार्यक्रमाणां च सहभागः इत्यादीन् अवलम्ब्य अस्ति । सद्यःकाले मानवसंसाधनविकासमन्त्रालयेन तन्त्रज्ञानम्, प्रबन्धनम्, फार्मसी, वास्तुकला, विश्वविद्यालयाः, महाविद्यालयाः इत्यादीन् अभिव्याप्य न्याशनल् इन्स्टिट्यूशन् रैङ्किंग् संस्थायाः (एन्.ऐ.आर्.एफ्.) आरम्भः कृतः अस्ति ।

अधोलिखिताः नीतिक्रमाः स्वीकरिष्यन्ते -

1. अन्ताराष्ट्रीयस्तरे मान्यताप्रणाल्याः अध्ययनाय काचित् विशेषज्ञसमितिः संस्थापयिष्यते । एषा उत्कृष्टनिष्पादनप्रणालीवतां देशानां द्वारा सर्वेत्कृष्टकार्याणाम् अनुभवं ग्रहीष्यति एन्.ए.ए.सि., एन्.बि.ए. इत्यनयोः पुनारचनापूर्वकम् अत्युत्तमपद्धतिं, मानदण्डनं च पुनः प्रबोधयिष्यति ।
2. प्रत्येकं संस्थायाः मूव्याङ्कनं, प्रत्यायनविवरणानि च समर्पितजालपुटद्वारा प्रकाशयिष्यन्ते, येन सामान्याः जनाः तानि प्राप्तुम् अर्हन्ति, विद्यार्थिनः अन्ये पोषकाश्च सूचितविषयचयनप्रक्रियायाः अवगमने समर्थाः भवितुम् अर्हन्ति च ।

## 4.17 मुक्तदूरस्थशिक्षणं मुक्तजालपुटपाठ्यक्रमः च

मुक्तदूरस्थशिक्षणयोजनायै (ओ.डि.एल्.) वर्धने, कौशलविकासे, क्षमतानिर्माणे, प्रशिक्षणे, वृत्तिनिर्माणे, आजीवनं शिक्षणप्राप्तौ, महत्त्वपूर्णप्रणालीरूपेण विकासे च मान्यता दत्ता अस्ति, अस्य स्वीकृति: जाता वर्तते च । अनेन मुक्तदूरस्थशिक्षणयोजनाधीन्ये चतुर्लक्षाधिकानां शिक्षार्थिनां नामाङ्कनं जातम् अस्ति । एषा योजना भारते शिक्षणविकासे महत्त्वपूर्णं योगदानं कुर्वती अस्ति । सार्वजनिकसंस्थानां स्वसंस्थानां च द्वारा प्रदीयमानस्य दूरस्थशिक्षणपाठ्यक्रमस्य अनेके प्रकारा: वर्तन्ते । एतत् तादृशविद्यार्थिभ्य: अवसरं कल्पयति, ये च स्वस्य वृत्तिं त्यक्तुं न प्रभवन्ति, अथवा केनचित् कारणेन नियतरूपेण कक्ष्यायाम् उपस्थातुं न शक्नुवन्ति वा । सम्प्रति देशे मुक्तशिक्षणं दूरस्थशिक्षणं च मुख्यत: इन्दिरागान्धिराष्ट्रियमुक्तविश्वविद्यालयद्वारा (IGNOU), उन्नतशिक्षणक्षेत्रे राज्यमुक्तविश्वविद्यालयानां द्वारा, प्राथमिकशिक्षाक्षेत्रे राष्ट्रियमुक्तस्कूलिङ्गसंस्थाद्वारा (एन्.ऐ.औ.एस्.) च दीयमानम् अस्ति । तथापि दूरस्थशिक्षणे गुणवत्ताया: विषये काश्चन समस्याः सन्ति, याश्च ओ.डि.एल्.प्रणाल्यां परिष्कारस्य आवश्यकतां दर्शयन्ति ।

व्यापक: मुक्त: च आन्लैन्पाठ्यक्रम: (MOOC) सापेक्षरूपेण न्यूनमूल्येन आधुनिकपाठ्यक्रमाणां निमित्तं नि:शुल्कतया च प्राप्तुं शक्यः । बह्व्य: अन्यशिक्षणसंस्था:, विश्वविद्यालयाश्च मुक्ताध्ययनवेदिकां निर्माय स्वस्य आन्लैन्-पाठ्यक्रमं यच्छन्ति । ज्ञानस्य निरन्तरम् अध्ययनाय वर्धमानायाः आकाङ्क्षायाः आवश्यकतानां च कारणतः भविष्यत्काले व्यापकतायुक्तस्य 'आन्लैन्-पाठ्यक्रमस्य (MOOC) विषये अभियाचना वर्धिष्यते । मानवसंसाधनविकासमन्त्रालयेन युवाकाङ्क्षिणां मस्तिष्कानां निमित्तं सक्रियाध्ययनाय वेब्अध्ययनस्य (SWAYAM) प्रारम्भ: कृत: अस्ति । एतच्च तादृशः कश्चन जालपुटः (वेब्सैट्) वर्तते यत्र विभिन्नेषु विषयेषु व्यापक: मुक्त: च आन्लैन्पाठ्यक्रम: प्राप्स्यते । व्यापकमुक्त-आन्लैन्पाठ्यक्रमस्य मान्यतायै प्रोत्साहनं संयोजनं, नियन्त्रणं, निर्वहणं, लाभस्य मान्यता, अन्तरणं, सञ्चयनम् इत्यादीनां निमित्तं तन्त्रस्य कस्यचन विकासाय कस्यचित् निकायस्य संस्थापनम् अत्यावश्यकम् अस्ति ।

एतदर्थम् अधोलिखिता: नीतिप्रकारा: स्वीक्रियन्ते -

1. कश्चित् स्वायत्तनिकायः स्थापयिष्यते, यश्च ओ.डि.एल्.-एम्.ओ.ओ.सी.प्रणाल्यां, मानकानां प्रोन्नयनं, संयोजनं, नियन्त्रणम् अनुरक्षणम् इत्यादीनाम् उत्तरदायी भवति । एषः ओ.डि.एल्., एम्.ओ.ओ.सी इत्यनयोः व्यवस्थिताय विकासाय नियन्त्रणाय च मानदण्डं, मानकं, दिशानिर्देशं च सज्जीकरिष्यति । एषः एम्.ओ.ओ.सी इत्यस्य माध्यमेन अर्जितस्य लाभस्य मान्यता, स्थानान्तरणं, सञ्चालनं, पदवीदानं, मान्यताप्रदानम् इत्यादीनां निमित्तं तन्त्रमपि सज्जीकरिष्यति ।

2. ओ.डि.एल्, एम्.ओ.ओ.सी. प्रकारेण पाठ्यक्रमं कार्यक्रमं च या: संस्था: चालयिष्यन्ति, तासां सर्वासां संस्थानां पूर्वोक्तपरिच्छेदे (प्यारा 1) उक्तेन स्वायत्तनिकायेन निर्धारितानां मानदण्डानां गुणवत्तानियमानां च अनुसारं राष्ट्रियस्य स्थानीयस्य च आवश्यकतानाम् आधारेण कार्यक्रमाणां विकास: तेषां मानवीकरणं च करिष्यते ।
3. गुणवत्तासुनिश्चयतासम्पादनाय ओ.डि.एल्.-एम्.ओ.ओ.सी.पाठ्यक्रमाणां कार्यक्रमाणां च संवर्धनाय, नवीनतासम्पादनाय, पुनर्निर्माणाय, आधुनिकतानिर्मित्यर्थं च सर्वेषु अपि विश्वविद्यालयेषु प्रत्यायननिमित्तं गुणवत्ताश्वासनस्य किञ्चन तन्त्रं निर्मास्यते ।
4. सर्वासाम् ओ.डि.एल्.संस्थानां द्वारा अध्येतृसहायतासेवा स्थापयिष्यते । अस्मिन् पाठ्यक्रमस्य निर्वहणं, रिपाजिटरीस्, मुक्तशैक्षिकसंसाधनस्य (ओईआर्)सज्जीकरणम्, एम्.ओ.ओ.सी, 24X7 सहायतापीठसेवा (डेस्क्), बोधकस्य आप्तसमालोचनसेवा, वेबिनार्स-समायोजनम्, चर्चावेदिका, वेब्कास्टिंग्, पुस्तकालयानुकूल्यपरिकल्पनम्, वास्तविकप्रयोगशाला:, ई-अध्ययनस्य प्रकारा:, आन्लैन्कार्यक्रमाणां प्रस्तुतीकरणं, असैन्मेण्ट्दानम्, योग्ये समये कार्यनिष्पादनस्य प्रतिपुष्टिप्राप्तिः, आन्लैन्परीक्षा:, फलितांशघोषणम्, आक्षेपाणां समाधानम् इत्यादय: अन्तर्भवन्ति ।
5. कौशलविकास-उद्यमितामन्त्रालयस्य सहयोगेन राष्ट्रियं मुक्तविद्याभ्याससंस्थानं (एन्.आई.ओ.एस्) व्यावसायिकशिक्षायां सम्भाव्याया: महायाचनाया: (डिमाण्ड्) परिहाराय आत्मानं परिष्करिष्यति । अनेन निर्वहणविषया:, विचारणम्, एन्.आई.ओ.एस्.गतिविधीनां परिशीलनम् इत्यादयः अंशाः समुचितरूपेण निरूढाः भविष्यन्ति ।

### 4.18 शिक्षाया: अन्ताराष्ट्रीयकरणम्

अन्ताराष्ट्रीयकरणस्य वैश्वीयकरणस्य च अस्मिन् युगे उच्चशिक्षणं, नूतनज्ञानस्य उत्पत्ति: च अपरिहार्य: आयाम: वर्तते । अन्ताराष्ट्रीयकरणे छात्राणां, विदुषां, सङ्कायस्य गतिशीलताया:, शैक्षणिकप्रणालीनां, संस्कृतेश्च आदानप्रदानम्, अनुसन्धानसहयोग:, ज्ञान-अन्तरणं, सामर्थ्यनिर्माणं पाठ्यक्रमस्य अधिगमपरिणामानाम् अन्ताराष्ट्रीयकरणं सीमातीतकार्यक्रमाणां वितरणम् इत्यादिकं समाविष्टं वर्तते । अपि च अस्मिन् वास्तविकगतिशीलता, डिजिटल् अध्ययनं च अन्तर्भूतम् अस्ति ।

उच्चशिक्षणस्य अन्ताराष्ट्रीयकरणात् उन्नतशिक्षासंस्थानां राष्ट्रियस्य अन्ताराष्ट्रीयस्य च स्पष्टता, व्यक्तिविवरणे वृद्धिकरणम्, उच्चशिक्षणस्य वर्धनाय व्यवस्था, छात्राणाम् आधिक्येन प्रवेश:, ज्ञानरूप-अर्थव्यवस्थायै साहाय्यम्, उभयपक्षयो: विकास:, नूतनस्य शैक्षणिकवातावरणस्य विभिन्नता उत्पत्ति: च इत्यादयः अनेके अवसराः कल्पिताः भविष्यन्ति ।

एतदर्थम् अधोलिखिता: नीतिक्रमा: स्वीक्रियन्ते -

1. विश्वस्य श्रेष्ठेषु विश्वविद्यालयेषु चितेभ्यः 200 विदेशीयविश्वविद्यालयेभ्यः भारतीयविश्वविद्यालयै: सह सहयोगस्य माध्यमेन भारते तदीयोपस्थिते: प्रतिष्ठापनाय प्रोत्साह:

प्रदास्यते । यदि अपेक्षा स्यात्, तर्हि कस्यचन समर्थस्य प्रकारस्य स्थापनाय पदस्थापनं करिष्यते । नीतिनियमाः रचयिष्यन्ते इत्यतः विदेशीयाः विश्वविद्यालयाः भारते अध्ययनं कुर्वद्भ्यः भारतीयविद्यार्थिभ्यः तादृशीं पदवीं प्रदातुम् अर्हन्ति, या च मूलदेशे अपि मूल्यवती स्यात् ।

2. अन्ताराष्ट्रीयतासम्पादनं द्विमुखप्रक्रिया इत्यतः भारतीयाः संस्थाः विदेशेषु परिसरान् आरब्धुं यथा शक्नुयुः तादृशाः अवसराः प्रदास्यन्ते । अपेक्षायां सत्यां सम्बद्धेषु शासनेषु परिनियमेषु च योग्यः परिष्कारः करिष्यते ।
3. भारते अधीतवतां छात्राणां विदेशेषु अङ्गीकारप्राप्तेः वर्धनाय, विदेशीयच्छात्राणाम् आकर्षणाय च उन्नतशिक्षणसंस्थानां पाठ्यक्रमस्य वैश्विकतासम्पादनाय विश्वस्तरीयत्वप्राप्त्यै, तद्द्वारा वैश्विकयोग्यतासम्पादनं, वैश्विकश्रेष्ठशिक्षणसंस्थासु उत्कृष्टस्थानप्राप्त्यै प्रोत्साहः च प्रदास्यते । प्रायः बहवः विदेशीयाः छात्राः भारतीयसंस्कृतेः अध्ययने, भारतसम्बद्धशास्त्राध्ययने च प्रवृत्तिं दर्शयन्तः आगच्छन्ति इत्यतः अन्ताराष्ट्रीयच्छात्राणाम् आकर्षणाय तानि क्षेत्राणि संवर्धयिष्यन्ते ।
4. उन्नतशिक्षणसंस्थासु विदेशीयच्छात्राणां निमित्तं भाषाबोधनकार्यक्रमाः सेतुबन्धकार्यक्रमाश्च भविष्यन्ति, येषां च द्वारा भाषान्यूनतापगमः उच्चस्तरीयपाठ्यक्रमस्य काठिन्यन्यूनीकरणं च भविष्यति ।
5. वैदेशिकाध्यापकाः भारतीय-उन्नतशिक्षणसंस्थासु यथा नियुज्येरन्, तथा नीतिनियमेषु परिवर्तनं करिष्यते, येन अधिकाः विदेशीयाध्यापकाः भारते उन्नतशिक्षणसंस्थाः प्रविशेयुः । विदेशीयाध्यापकैः छात्रैश्च सम्मुखीक्रियमाणाः पारपत्रप्राप्तिः, पञ्जीकरणं, वासकालविस्तारः, नियमकठोरता, आनुकूल्याभावः इत्यादयः वास्तविक्यः समस्याः परिहरिष्यन्ते ।
6. सर्वकारीयवित्तपोषिताभ्यः उन्नतशिक्षणसंस्थाभ्यः अधिकसम्पन्मूलप्रदानाय अन्ताराष्ट्रीयतासम्पादनं कश्चन अधिको गुणः इति परिगणयिष्यते ।
7. यैः देशैः सुचारुतया उन्नतशिक्षणसंस्थासु शैक्षिककार्यक्रमेषु च गुणवत्ताश्वासनम् इत्याद्याः उपक्रमाः यथाक्रमं पालिताः ये च योग्याश्च वर्तन्ते, तादृशैः देशैः सह परस्परसंलापाय उपक्रमाः भविष्यन्ति । एतादृशानां देशानां समूहस्य निर्माणात् उन्नतशिक्षणे स्वेन स्वेन देशेन प्रदीयमानानां पदवीनां परस्परमान्यतासम्पादनं भविष्यति ।
8. क्रमशः वार्षिकमानदण्डेन मान्यताप्रदानस्य व्यवस्थां न्यूनीकृत्य गुणवत्तामानदण्डेन मान्यताप्रदानस्य परम्परायाः आरम्भाय उपक्रमाः करिष्यन्ते ।

### 4.19 उन्नतशिक्षणे प्रशिक्षणकौशलवर्धनम्

उन्नतशिक्षणव्यवस्थायां वेगेन विस्तारस्य वर्धमानतया, अध्यापकानां स्तरस्य, अध्यापनस्तरस्य च वर्धनम् अत्यन्तं प्रमुखं सञ्जातम् । गुणवत्तायुतस्य शिक्षणस्य प्रदानपरिप्रेक्ष्ये उत्तमाः कौशलवन्तः च शिक्षणवृत्तिं प्रविशेयुः, शिक्षणक्षेत्रप्रवेशात् पूर्वं तेषां प्राथमिकी सिद्धता समीचीना स्यात्, ततश्च वृत्तिसम्बद्धवर्धनाय अवसरः च प्रदेयः भवेत् । उन्नतस्थाने विद्यमानानां

प्रबन्धनकौशलं कस्यचिदपि विश्वविद्यालयस्य सुचारुनिर्वहणम् अपेक्षते । अधुनातनीया कुलपति-कुलसचिव-इतरज्येष्ठप्रबन्धनव्यक्तेः नियुक्तिप्रक्रिया उन्नशिक्षणसंस्थानां समीचीनतया कार्यनिर्वहणं प्रतिबध्नाति । आसां समस्यानां दूरीकरणाय उपायाः चिन्तनीयाः । शिक्षणक्षेत्रे नायकत्वगुणयुताः कठिनासु समस्यासु उपस्थितासु निर्णयस्वीकरणसमर्थाः च अपेक्षिताः ।

अधोनिर्दिष्टाः तात्त्विकाः उपक्रमाः आरप्स्यन्ते -

1. कुशलानां तज्ज्ञानां कार्यकारिसमितिः काचित् रचयिष्यते, यया च विश्वप्रसिद्धैः विश्वविद्यालयैः अनुस्रियमाणा नियुक्तिप्रक्रिया, पदोन्नतिप्रक्रिया, अवरोधनप्रक्रिया इत्यादीनि अधीत्य, उन्नतशिक्षणसंस्थासु बौद्धिक-शैक्षणिकविकासाय स्वीकर्तव्याः उपक्रमाः सूचयिष्यन्ते ।
2. शिक्षणक्षेत्रं प्रति युवसु वर्तमानस्य कौशलस्य आकर्षणाय राष्ट्रव्यापी कार्यक्रमः उद्घोषयिष्यते । शिक्षणवृत्तौ यूनः आक्रष्टुम्, एम्.फिल्-पि.एच्.डि.-कक्ष्यासु अधीयानानां शोधच्छात्राणां शैक्षिकाभिवृद्धौ अकाडेमिक् असिस्टेण्ट्स्, अकाडेमिक् असोसियेटर्स इति च नामकरणं भविष्यति ।
3. नूतनतया नियुक्तानाम् अध्यापकानां मासत्रयात्मक-षण्मासात्मकप्रशिक्षणकार्यक्रमान् आयोजयितुं राष्ट्रस्तरीय-राज्यस्तरीयप्रशिक्षणसंस्थनानि आरप्स्यन्ते । उन्नतशिक्षणसंस्थासु अध्यापकपदवीम् (औपचारिकरूपेण) प्राप्तुं नूतनतया नियुक्तिं प्राप्तवद्भिः अध्यापकैः ईदृशम् अध्यापनप्रमाणपत्रम् अवश्यं प्राप्तव्यमिति नियमः भविष्यति । तस्मिन् प्रशिक्षणकार्यक्रमे अध्यापन-संशोधनप्रणाल्यः (फ्लिप्-कक्ष्यासहयोगः, सहयोगात्मकम् अध्ययनम्, 'केस्'अप्रोच् इत्यादयः) सूचनासम्प्रेषणविधेः उपयोगः, पाठ्यक्रमस्वरूपम्, शैल्यादिकं, लिङ्गसमानतासाधनं, सामाजिक-सामरस्यं, वृत्तिधर्माः, उत्तमोत्तमोपक्रमाणां विनिमयः, स्वक्षेत्रीयाध्ययने जनानाम् अभिवृद्धीनाम् अध्ययनं, तत्तत्कालीनं ज्ञानम् इत्यादिकम् अन्तर्भवति । अस्य प्रशिक्षणकार्यक्रमस्य समनन्तरं तदीये विश्वविद्यालये चतुस्सप्ताहात्मकः सप्ताहषट्कात्मको वा नैपुण्यवर्गः सञ्चालयिष्यते येन च तेन स्वयं संस्थायाः संस्कृतिः, स्वोत्तरदायित्वम् इत्यादिकम् अवगन्तुं शक्येत ।
4. आधुनिकतन्त्रज्ञानस्य निरन्तर-अभिवृद्धेः कारणात्, अध्यापकस्य जीवने महत् परिवर्तनं जातम् । ज्ञानस्य नवीनाः आयामाः उत्पन्नाः । तस्य परिणामः छात्रस्य जीवनेऽपि परिदृश्यते । परिवर्तिते कालघट्टे अध्यापकच्छात्रयोः पात्रं पुनः परिभाषितं करिष्यते, येन स्वाध्यायः, प्रायोगिकपारस्परिकशिक्षणावयवसंयुतं शिक्षाशास्त्रीयं किञ्चन आन्वयिकं स्वरूपं च प्रोत्साहितं स्यात् । एतदर्थं मौल्यमापने परीक्षासु च परिवर्तनम् अपेक्षितम् ।
5. अध्यापकानां शैक्षिककार्यजातस्य मौल्यमापनाय उत्कृष्टविमर्शसहिता काचित् व्यवस्था क्वचित् संस्थापयिष्यते येन च सार्वजनिक-वित्तद्वारा प्रचाल्यमानानां संस्थानां शैक्षणिकम् उत्तरदायित्वं परिपूर्णं स्यात् ।

6. योग्यानां चयने समर्था, नियुक्तितत्त्वयुता च काचित् व्यवस्था भविष्यति, येन अध्यापनक्षेत्रं प्रति पार्श्विकाय प्रवेशाय निर्गमाय च अनुमतिं दत्त्वा सहायकसङ्कायरूपेण कार्यं कर्तुम्, अस्थायिविशेषनियुक्तिं प्रोत्साहयितुं, यन्त्रागार-सर्वकारादिभ्यः इतरक्षेत्रेभ्यः तज्ज्ञानां शिक्षणक्षेत्रं प्रति आगमनं प्रतिगमनं च निर्बाधं कर्तुं च आनुकूल्यं स्यात् ।
7. सुप्रसिद्धासु प्रतिष्ठावतीषु उन्नतशिक्षणसंस्थासु नायकत्व-उत्तेजककेन्द्राणाम् आरम्भाय प्रोत्साहनं भविष्यति । तैः केन्द्रैः ज्येष्ठानाम् अध्यापकानां निमित्तम्, उन्नतशिक्षणसंस्थानिर्वहणाय अल्पकालिकाः कार्यक्रमाः करिष्यन्ते । तेषु ज्येष्ठैः अध्यापकैः अवश्यम् उपस्थातव्यं भविष्यति उन्नतस्तरीयनायकत्वस्थानेषु आत्मनः चयनाय । एतेषु नायकत्वोत्तेजककार्यक्रमेषु निर्णयस्वीकरणं, समानता, वित्तीयव्यवस्था, वित्तीयक्रमः शैक्षणिक-वित्तीय-मानवसम्पन्मूलनिर्वहणं, समस्यापरिहारः, दुर्बलवर्गं प्रति संवेदनशीलता इत्यादयः विषयाः अन्तर्भविष्यन्ति येन च प्राशासनिकानां प्रबन्धकीयानां च कौशलानां परिष्कारः भवेत् ।

**4.20 अनुसन्धानं नवगवेषणं नूत्नं ज्ञानं च**

विगते दशके संशोधनलेखनेषु कृतिषु च वैश्विकस्तरे भारतस्य भागः यद्यपि वर्धितः दृश्यते, तथापि संशोधनस्तरः न तथा सन्तोषं जनयति । द्वित्राणि अङ्गुलिगणनीयानि वैशिष्ट्यानि विहाय अन्या समग्रा व्यवस्था मध्यमस्तरीया एव वर्तते । संशोधनासक्तिमन्तः छात्राः अध्यापकाश्च विदेशं गन्तुमिच्छन्ति । यतः संशोधनयोग्यं वातावरणं तैरत्र न प्राप्यते । उन्नतस्तरीयसंशोधनस्य प्रचाराय योग्यं वातावरणं निर्मातव्यम् । संशोधनाय नवीनाविष्काराय च अपेक्षितः उन्नतशिक्षणस्य प्रोत्साहकः शैक्षणिकः प्राशासनिकः च परिवेषः अस्माकं देशे निर्मातव्यः । तन्त्रज्ञानशक्तिरूपेण भारतस्य उद्गमम् उपलक्ष्य, ज्ञानाधारिते समाजे नूतनशैक्षणिकशास्त्राणां प्रचारस्य आवश्यकता वर्तते ।

एतदर्थम् अधोनिर्दिष्टाः तात्त्विकाः उपक्रमाः अनुष्ठास्यन्ते -

1. आगामिनि दशके, उन्नतशिक्षणक्षेत्रे सार्वजनिकस्वायत्तभेदं विना न्यूनातिन्यूनं शतं विशिष्टगुणवत्ताकेन्द्राणि विशिष्टगुणवत्ताविभागाः च आरप्स्यन्ते, येषां द्वारा संशोधने विशिष्टा गुणवत्ता साधयिष्यते, नवोन्वेषाणां प्रोत्साहः भविष्यति च । स्वायत्तविश्वस्तमण्डलीभ्यः, शिक्षणतज्ज्ञेभ्यः, संस्थाभ्यश्च ईदृशातिविशिष्टगुणवत्ताकेन्द्राणि आरब्धुम् अनुमतिः प्रदास्यते ।
2. राष्ट्रिय-शैक्षिक-आयोजन-प्राशासनिक-विश्वविद्यालयेन (एन्.यु.ई.पि.ए.) संशोधनकार्यसूच्यां नैपुण्यप्रणाल्याः सुस्पष्टः पुनर्विमर्शः करिष्यते, येन वास्तविक्यः समस्याः गोचरीभवेयुः ।
3. नूतनज्ञानोत्पादनस्य नूतनज्ञानान्वयनस्य च प्रोत्साहाय, उन्नतशिक्षणे पाठ्यक्रमे नूतनज्ञानशाखानां योजनाय, तद्द्वारा भारतस्य तन्त्रज्ञाननायकत्वे बलप्रदानाय च उपक्रमाः भविष्यन्ति ।

4. उन्नतशिक्षणसंस्थासु नवोन्मेषशीलायाः प्रतिभाया: स्वायत्तोद्योगस्य च प्रचाराय शताधिकाः पोषणसंस्था: संस्थापयिष्यन्ते आगामिषु पञ्चसु वर्षेषु ।
5. नूतनज्ञानसंरक्षणाय, विशिष्य अन्त:शास्त्रीयाध्ययनसंशोधनस्य विकासाय, अपेक्षितस्य मानवसम्पन्मूलस्य संवर्धनाय आन्ताराष्ट्रसहयोगानां प्रोत्साह: करिष्यते ।

## 4.21 शिक्षणस्य वित्तसाहाय्यम्

भारतीयपरिवेषे शिक्षणं सार्वजनिकहिताय इति मन्तव्यम् । सार्वजनिकवित्तविनियोग: इतोऽप्यधिक: अपेक्षित: अस्मिन् क्षेत्रे । तादृशानि उदाहरणानि दर्शयितुं शक्यानि यत्र बहुषु देशेषु शिक्षणव्यवस्था प्रायः स्वायत्ता, तत्र आर्थिकी सामाजिकी वा उन्नति: साधयितुं न शक्ता, मौल्यानां हानिरेव दृष्टा च । यै: देशै: शिक्षणं सार्वजनिकम् इति चिन्तितं तै: श्रेष्ठा उत्तमा सामाजिकी उन्नति: नैरन्तर्येण प्राप्ता ।

1968 तमे वर्षे 1986/92 तमे वर्षे च या: राष्ट्रियनीतय: उद्घुष्टा: तासु सकलगृहीयायस्य (जि.डि.पि.) 6% भाग: शिक्षणक्षेत्राय व्ययितव्यः इति निश्चितम् आसीत् । किन्तु वास्तविक: व्यय: तु एतदपेक्षया निरन्तरं बहु न्यून: । एषु वर्षेषु व्ययपरिमाणम् अस्ति 3.5 % मितम् । अनेन ज्ञायते यत् लक्ष्यपरिसिद्धये शिक्षणक्षेत्रविषये इतोऽपि अधिकः व्यय: करणीय: इति ।

एतदर्थम् अधोनिर्दिष्टा: नीत्युपक्रमा: भविष्यन्ति -

1. सर्वकारेण आ बहोः कालात् प्रतीक्ष्यमाणं सकलगृहीयायस्य (जि.डि.पि.) 6% भागात्मकं व्ययलक्ष्यं प्राप्तुं शिक्षणक्षेत्रे वित्तनिक्षेपस्य वर्धनं करिष्यते प्रशासनेन ।
2. सर्वकारीयाणां प्रयत्नानां साहाय्यार्थं, शिक्षणतज्ज्ञानां सेवाद्वारा सि.एस्.आर्.व्यवस्थाद्वारा च शिक्षणक्षेत्रे वित्तनिक्षेपस्य प्रोत्साहनं करिष्यते । स्वायत्तसंस्थाभि: यत्र शिक्षणक्षेत्रे वित्तनिक्षेप: क्रियेत, तासां प्रोत्साहनाय करावकर्षः, भौतिकसम्पन्मूले शिक्षणस्यापि अन्तर्भाव: इत्यादीनि करिष्यन्ते । तन्नाम, सामान्यत: मुख्यानि कार्याणि सर्वकारीयधनेन क्रियन्ते, अन्यानि आनुषङ्गिकाणि कार्याणि स्वायत्तवित्तनिक्षेपद्वारा भवितुमर्हति । शिक्षणसंस्थासु गुणवत्तावर्धनकार्यार्थं संशोधनाभिवृद्ध्यर्थं च स्वायत्तवित्तनिक्षेप: विदेशीयवित्तस्य साक्षान्निक्षेपश्च (एफ्.डि.आय्) प्रमुखकार्यनीतित्वेन उपयोक्ष्यन्ते, वित्तसम्पन्मूलसङ्कलनाय ।
3. नूतनानां शिक्षणसंस्थानाम् आरम्भापेक्षया, यासाञ्च आरम्भार्थं प्रभूतं धनम् अपेक्षितं, विद्यमानानां संस्थानां बलवर्धनाय यत्न: करिष्यते सर्वकारेण प्राशस्त्येन ।
4. सर्वकारपोषिताभि: उन्नतशिक्षणसंस्थाभि: वित्तीयसम्पन्मूलवर्धनाय उपाया: चिन्तनीया:, अन्यानि वित्तीयसम्पन्मूलानि छात्रचरनिधि:, उदारदाननिधि: बोधनशुल्कवर्धनं, स्वायत्तवित्तनिक्षेप: इत्यादीनि अन्वेष्टव्यानि । किन्तु लाभात् वञ्चिते वर्गे जातेभ्यः बोधनशुल्कापकर्षोऽपि अवश्यमेव चिन्तनीय: ।

5. अधुना उपलभ्यमानाः शैक्षणिकयोजनाः वित्तीयदृष्ट्या ये निर्धनाः स्युः तान् प्रापयितुम् आसु योजनासु परिवर्तनं करिष्यते । ऋणस्य वृद्धिप्रमाणं न्यूनीकरिष्यते, ऋणप्रत्यर्पणकालस्य वर्धनं करिष्यते । इदानीम् एकवर्षात्मकं यत् स्यात् तत् वर्षद्वयात्मकत्वेन परिवर्तयिष्यते ।
6. उत्कर्षवर्धनाय दक्षतासम्पादनाय च उन्नतशिक्षणसंस्थासु कार्यकेन्द्रितानुदानप्रदानाय उपक्रमाः भविष्यन्ति ।

## अध्याय: - 5

# क्रियान्वयनं परिनिर्वहणं च

2016 तमवर्षीया राष्ट्रियशिक्षानीति: अनेकान् दिशानिर्देशान् सम्प्रददाति । एषा 1968 तमवर्षीयाया: नीते: 1986/92 तमवर्षीयनीते: च अनुवर्तनरूपा अस्ति इत्येतत् वयम् अवधातुम् अर्हाम: । एतदत्र अवधातव्यम् अस्ति यत् अभिप्रेतस्य लक्ष्यस्य क्रियान्वयनार्हाया: कार्यनीते: च शिक्षाया: परिदृश्ये रूपान्तरं कल्पयितुं समर्थां वास्तविकरूपतां परिकल्पयितुं च केन्द्रेण राज्यसर्वकारै: च सहयोगिसासूहिकभावनया सम्भूय कार्यं करणीयम् अस्ति ।

शिक्षणक्षेत्रस्य फलावाप्तार: बहव: सन्ति । तेषां महत्त्वं च अस्ति, येषां द्वारा स्पष्टा लक्ष्यप्राप्ति: भवितुमर्हति, येन शिक्षणे अनुमते: वर्धनं, समानताया: निश्चय:, स्तरवर्धनं, सर्वेषु विभागेषु तद्द्वारा छात्रान् समर्थान् कृत्वा तेषां वैश्विकप्रजात्वसम्पादनम् इत्यादिकं प्रवर्तेत । तान् योग्यं शिक्षणं कौशलं व्यवहारं च शिक्षयित्वा ज्ञानाधारितसमाजस्य पणं सम्मुखीकर्तुम् अपेक्षितस्य अभ्यासस्य प्रदानं स्यात् ।

अस्या: नीते: घोषणसमनन्तरं विस्तृता अनुष्ठानप्रणाली अपि फ्रेम्वर्क फार् एक्षन् (एफ् एफ् ए) द्वारा भविष्यति येन पूर्वेक्तानां प्रत्येकं सूचनानामपि सम्यगनुष्ठानं स्यात् । इदमत्र वक्तव्यं यत् नीतौ उक्ता: अंशा: यथावत् पालनीया: इति, एते परिवर्तयितुम् अशक्या: इति वा चिन्तनीयं नास्ति । अपि तु इदम् उद्दिष्टस्य मार्गस्य प्रदर्शनपरमेव । विविधेषु अंशेषु परिवर्तनमपि उद्दिष्टमेव । यत: लक्ष्याणां वैविध्यवशात् स्थानीयपरिवेषाणाम् अपि भेद: वर्तते एव । कालानुगुणं प्रसङ्गाः अपि परिवर्तन्ते एव । अत: यदि नीतौ ईषदपि परिवर्तनं नाङ्गीक्रियेत तर्हि अनुष्ठानं क्लेशदायकं दुश्शकं च स्यात् ।

बहूनि एतादृशानि उदाहरणानि प्रदर्शयितुं शक्यानि, यत्र योग्याया: अनुष्ठानव्यवस्थाया: अभावात् पूर्वतननीते: निर्णया: अनुष्ठानपथं न आगता: एव इति । एतादृशानां प्रसङ्गानां निवारणाय प्रत्येकं राज्येन केन्द्रशासितप्रदेशेन च फ्रेम्वर्क फार् एक्षन् (एफ् एफ् ए) सज्जीकरणीयं प्रादेशिकतां सामाजिकीं सांस्कृतिकीं च परिस्थितिं मनसि निधाय । एतद्द्वारा शिक्षणसंस्थासु सांस्थिकसिद्धता:, प्राशासनिकव्यवस्थानिर्माणं च कृत्वा स्पष्टकार्यक्षमतामापकादिकं सज्जीकृतं चेत् गुणयुता: परिणामा: सुमहन्ति अपि लक्ष्याणि च अवश्यमेव साधयितुं शक्यानि । सांविधानिकविकेन्द्रीकरणयुक्ते अस्मिन् कालघट्टे समुदायानां महान् सहभाग: अत्यन्तम् अपेक्षित: । लक्ष्यप्राप्तिरूपणतन्त्रस्य एषा प्रक्रिया तलस्पर्शिनी प्रत्येकं जनपदव्यापिनी च स्यात्, यत्र च स्वीया कार्यानुष्ठानपद्धति: (एफ् एफ् ए) सज्जीकृता स्यात् ।

प्रत्येकं शिक्षणसंस्था अपि सूक्ष्मेक्षिकायुक्ताम् अनुष्ठानप्रणालीम् अवश्यं सज्जीकुर्यात् इति आशयः।

वित्तीयसम्पन्मूलानि सर्वदा समस्यायन्ते, येन तानि परिणामे न्यूनतां जनयन्ति, तद्द्वारा समग्रासर्वकारीयायां व्यवस्थायां, स्वायत्तक्षेत्रे, इतरसर्वकारीयोपक्रमेषु, अन्ततः समग्रे देशे च विपरिणामः सञ्जायते । अतः एतैः सर्वैः सम्भूय एतत् शैक्षिकसम्पन्मूलबलप्रदानस्थं राष्ट्रियम् उत्तरदायित्वं स्वीकरणीयम् एव । शैक्षणिकव्यवस्थायाः योग्यव्ययीकरणसंस्कारः उत्तरदायित्वग्रहणं च अपेक्षितम् अग्रे सर्तुम् ।

अनुष्ठानप्रणाल्याः आवरणसज्जताकाले शिशुपालनकेन्द्राणि, पौष्टिकाहारदानम्, आरोग्यं, क्रीडाः, स्वच्छता, जलसम्पन्मूलानि इत्याद्याः शिक्षणक्षेत्रसम्बद्धाः अन्याः सेवाः अपि योजनीयाः, येन परिणामप्राप्तौ एकरूपता स्यात् । सम्बद्धासु बहुमुखीषु संस्थासु शिक्षणेतरविभागानां मध्येऽपि सहकार्यकरणस्था मानसिकता अवश्यं वर्धनीया ।

पूर्वतनानाम् अनुभवानां द्वारा पाठं पठित्वा तद्द्वारा प्रत्येकं कार्यकेन्द्रेणापि योग्याः मानकपद्धतयः तन्त्राणि व्यवस्थाश्च निर्मातव्याः, येन काले काले प्रगतेः मौल्यमापनं, मूल्याङ्कनं, प्रत्येकम् अंशैः परिणामप्राप्तौ अवाप्ता प्रगतिः च अवगम्येत । एतत् मूल्याङ्कनं राष्ट्रराज्यसर्वकारेषु स्थूलात् सूक्ष्मं प्रति इति तत्त्वम् अवलम्ब्य भविष्यति । तेन च मध्यकालीनपरिष्कारार्थं आनुष्ठानिकपरिवर्तनार्थं च अपेक्षिता व्यवस्थिता प्रक्रिया सिद्ध्यति प्रकटलक्ष्यप्राप्त्यै । एतेन मध्यकालीनव्यवस्थानाशसम्भावना दूरीकृता भविष्यति, यस्य विपरिणामे दृष्टेः अनवगमः नीत्युक्तलक्ष्मकूर्दनं च स्यात् ।

उपर्युक्तान् अंशानपि संयोज्य, अस्माकं देशस्य वैशाल्यं, विविधतां, विभिन्नस्वरूपादिकं च मनसि निधाय शिक्षणस्य आनुष्ठानिक-उपविभागान् च विज्ञाय, ज्ञानाधारितस्य सूचनाधारितस्य चटुलस्वभावयुकतस्य समाजस्य परिप्रेक्ष्यं च ज्ञात्वा तदा तदा जायमानाः समस्याः उपलक्ष्य, काले काले एतेषां मूल्याङ्कनं कार्यम् । अतः अस्याः नीतेः पञ्चवार्षिकं मूल्याङ्कनं करणीयं, तत्तत्कालीनराष्ट्रिय-जागतिकप्रवृत्तेः समं पुरोगमनाय ।